१४ ढ़ ळ. ह—इति दुःस्पृष्टौ द्वौ॥२॥ तथा चाह कात्यायनः— **"डढौ ळळ्हावेकेषाम्"** (का० प्राति० ४।१४४।) इति॥ एतच्च स्वरमध्ये समानपदे द्रष्टव्यम्। अषाढ़ा। अषाळ्हा। अत्र द्वितीयो वर्णो माध्यन्दिनानां नास्ति॥

——

१५ घ. झ. ढ. ध. भ—इति नादाः संवारा घोषाः पञ्च॥५॥ ख. छ. ठ. थ. फ—इति श्वासा विवारा अघोषाः पञ्च॥५॥ एषां द्वादशव्यञ्जनवर्णानां स्पृष्टत्वं सोष्मत्वं महाप्राणत्वं च साधर्म्यम्।

र. ल. ङ. ण. न. मादोनामपि सोष्मत्वं संभाव्यते; किन्तु छन्दोभाषायां तेषामनाम्नाना(या)दनादरः ॥

——

१६ अँ. इँ. ऋँ. लृँ. ऊँ—इति नासिक्या भाविनः स्वरा ह्रस्वदीर्घप्लुतभेदाच्चतुर्द्दश ॥१४॥ "लृकारस्य दीर्घत्वं नास्ति" ॥ विशुद्धविवृताकारस्य मूलप्रकृतितया भावित्वाभावेऽप्यनुनासिकस्य भावित्वं नापोद्(ह्)यते। एँ ऐँ.ओँ.औँ—इति नासिक्याः संध्यक्षरस्वरा दीर्घप्लुतभेदादष्टौ ॥८॥ ते चोभये प्रत्येकमुदात्तानुदात्तस्वरितभेदाद्भिन्ना इति षट्षष्टिः।(६६)। तेषामनुनासिकत्वमस्पृष्टत्वं विवृतत्वं च साधर्म्यम् ॥

——

१७ अं—इत्यत्र स्वरादुत्तरोऽनुस्वारवर्णः ॥
आ ꣳ—इति विशुद्धाद्दीर्घस्वरादुत्तरो रङ्गवर्णः ॥
यँ. वँ. लँ—इति त्रयोऽन्तस्थाः ॥
कुँ. खुँ. गुँ. घुँ—इति चत्वारो यमाः ॥
ङ ञ ण न म—इति नादाः संवारा घोषाः पञ्च ॥

एषां चतुर्द्दशानां नासिक्यत्वं साधर्म्यम्। अत्र तालव्यानामल्पप्राणघोषस्पृष्टदुःस्पृष्टेषत्स्पृष्टानामनुनासिकत्वे समानमुच्चारणं भवतीत्यनुनासिकेषत्स्पृष्टापेक्षया पृथक्त्वेन चवर्गपञ्चमनासिक्यस्य वर्णान्तरत्वव्यवस्थापनं नोपपद्यते। तथापि चिरंतनलोकव्यवहारानुरोधादिह वर्णान्तरत्वमाख्यातमिति सन्तोष्टव्यम् ॥

मुखमध्यस्थानां तालव्यमूर्द्धन्यदन्त्यानामनुनासिकानां मृदुतीव्रस्पृष्टपरत्वेऽनुस्वारवत् समानमुच्चारणं भवति। "सञ्चारः। सञ्जयः। कण्ठः। काण्डः। दन्तः। स्कन्दः। इत्येवमेषामुच्चारणे विशेषानुपलब्धेः ॥ एवमपि—अस्पृष्टेषत्स्पृष्टपरत्वे गुणगुण्यादौ विशेषोपलब्धिरस्तीति णकारस्य वर्णान्तरत्वं युक्तम् ॥ "अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानामयोगवाहत्वं साधर्म्यम् ॥ तदित्थं छन्दोभाषायां सप्ताशीतिशतं

वर्णाः सिद्ध्यन्ति ॥१८७॥ येषां तु मते विंशतिर्यमा इष्यन्ते तेषां त्र्यधिकं शतद्वयम् [२०३] वर्णानामुपपद्यते । तथाच सप्तनवतिर्वा, सप्ताशीतिशतं वा, त्र्यधिके द्वे शते वा वर्णा यत्र मतभेदेनाम्नायन्ते, सैषाऽऽर्षेयी वर्णमातृका पथ्यास्वस्तिः प्रतिपत्तव्या ॥२॥

॥ इति द्वितीयः खण्डः ॥

——

मातृकानुवाके

॥ अथ ब्राह्मो वर्णसमाम्नायः

चातुःषष्टिकस्तृतीयः खण्डः ॥ ३ ॥

१ संक्षेपतश्चतुःषष्टिरेवैते वर्णा आम्नायन्ते । तदुक्तं पाणिनिना—

त्रिषष्टिर्वा चतुःषष्टिर्वर्णाः संभवतो मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ॥१॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥२॥
अनुस्वारो विसर्गश्च ᳲक ᳲपौ चापि पराश्रयौ ।
दुःस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव च ॥३॥ (इति)

——

२

अ	आ	अ ३
इ	ई	इ ३
उ	ऊ	उ ३
ऋ	ॠ	ऋ ३
लृ	०	०

——

॰ ए ए ३
॰ ऐ ऐ ३
॰ ओ ओ ३
॰ औ औ ३—इति स्वरा एकविंशतिः ॥२१॥

——

३ ग ज ड द ब
क च ट त प
घ झ ढ ध भ
ख छ ठ थ फ
ङ ञ ण न म–इति पञ्चविंशतिः स्पर्शाः ॥२५॥

——

४ य र ल व
श ष स ह–इत्यष्टौ यादयः ॥८॥

——

५ ≍ क—इति जिह्वामूलीयः ॥
≍ प—इति उपध्मानीयः ॥
अं—इत्यनुस्वारः ।
अः—इति विसर्जनीयः ।
कुँ खुँ गुँ घुँ—इति यमाः । इति अयोगवाहा अष्टौ ॥८॥

——

६ ळ—इति दुःस्पृष्ट एकः ॥१॥

——

७ लृकारः प्लुतः प्रयोगतो नास्तीति त्रिषष्टिः । संभवतोऽस्तीति चतुःषष्टिः ।

——

८ कात्यायनस्तु प्रातिशाख्ये हुमिति नासिक्यमधिकं मन्यमानः प्राह—

त्रयोविंशतिरुच्यन्ते स्वराः शब्दार्थचिन्तकैः ॥
द्विचत्वारिंशद् व्यञ्जनान्येतावान् वर्णसंग्रहः ॥१॥
एते पञ्चषष्टिर्वर्णा ब्रह्मराशिरात्मवाचः ॥
यत्किञ्चिद् वाङ्मयं लोके सर्वमत्र प्रतिष्ठितम् ॥२॥

——

९ स्वरमन्तरेणोच्चारयितुमशक्यत्वादनुस्वारविसर्गयोर्व्यञ्जनत्व-सिद्धान्तः ॥

——

१० उदात्तानुदात्तस्वरितानामैकभाव्यविवक्षणान्न स्वरातिरेकः। स्वरभक्तेः स्वरेऽन्तर्भावः। विवृतेः संवृताकारस्य चाकारेऽन्तर्भावः दुःस्पृष्टान्तस्थानामीषत्स्पृष्टान्तस्थैरुपसंग्रहः। औरस्यहकारस्य कण्ठ्यहकारेणोपसंग्रहः। रङ्गस्यानुस्वारेऽन्तर्भावः ॥

——

११ अस्य चाक्षरसमाम्नायस्य ऋक्तन्त्रव्याकरणे संप्रदायः श्रूयते। यथा-

"इदमक्षरच्छन्दो वर्णशः समनुक्रान्तम्। ब्रह्मा बृहस्पतये प्रोवाच। बृहस्पतिरिन्द्राय। इन्द्रो भरद्वाजाय। भरद्वाजः ऋषिभ्यः। ऋषयो ब्राह्मणेभ्यः। तं खल्विममक्षरसमाम्नायं ब्रह्मराशिरित्याचक्षते। न भुक्त्वा न नक्तं प्रब्रूयात्"। इति।

॥ इति तृतीयः खण्डः ॥३॥

——

ऐकपंचाशिकश्चतुर्थः खण्डः ॥४॥

अथ माहेश्वरो वर्णसमाम्नायः

१ तत्रैकपञ्चाशद्वर्णा आम्नायन्ते ।

२

अ	इ	उ	ऋ	ऌ
०	ए	ओ	ऐ	औ
ह	य	व	र	ल
ञ	म	ङ	ण	न
झ	भ	घ	ढ	ध
ज	ब	ग	ड	द
ख	फ	छ	ठ	थ
च	ट	त	क	प
श	ष	स	ह	०

——

३ अनुस्वार-विसर्ग-जिह्वामूलीयोपध्मानीय-यमानामकारोपरि शर्षु च
पाठस्योपसंख्यानम्—इति महाभाष्यम् । एतैरेकपञ्चाशद्वर्णैः
सर्वेऽप्यन्ये वर्णा उपसंगृहीता भवन्ति ॥

इति चतुर्थः खण्डः ॥४॥

——

साप्तत्रिंशिकः पंचमखण्डः ॥५॥

होडाचक्रनाम्नी आसुरी वर्णमातृका सप्तत्रिंशद्वर्णा ।

१ असुराणां पुरात्वे बहवोऽवान्तरभेदा आसन् । तेष्वेको मयासुर-
विभागो विद्याशिल्पकलावीरतासभ्यतागुणविशेषाच्छ्रेष्ठ आसीत्
एष एवासुरविभागः पुरात्वे यवन इत्याख्यायते स्म ।

तस्य च वर्णमातृका होडाचक्रनाम्नी पुरायुगे सप्तत्रिंशिकाऽऽसीत् । सा यथा—

अ व क ह ड
म ट प र त
न य भ ज ख
ग स द च ल—इति प्रस्तीर्या वर्णा विंशतिः ॥२०॥

——

२ अ· इ · उ · ए · ओ—इति मात्रावर्णाः पञ्च ॥५॥

——

३ घ ङ छ
ष ण ठ
ध फ ढ़
थ झ ञ—इति परिशिष्टा वर्णा द्वादश ॥१२॥

——

४ प्रस्तीर्येष्वकारः संवृतो व्यञ्जनवत् । मात्रावर्णेषु त्वकारो विवृतः स्वर इति भेदः । प्रस्तीर्याणां मात्रायोगात् प्रस्तारे स्वरिताः शतं वर्णाः स्युः । ते यथा—

(१)	अ. ब. क. ह. ड इ. बि. कि. हि. डि उ. बु. कु. हु. डु ए. बे. के. हे. डे ओ. बो. को. हो. डो	(२)	म. ट. प. र. त मि. टि. पि. रि. ति मु. टु. पु. रु. तु मे. टे. पे. रे. ते मो. टो. पो. रो. तो

(३)	न. य. भ. ज. ख नि. यि. भि. जि. खि नु. यु. भु. जु. खु ने. ये. भे. जे. खे नो. यो. भो. जो. खो	(४)	ग. स. द. च. ल गि. सि. दि. चि. लि गु. सु. दु. चु. लु गे. से. दे. चे. ले गो. सो. दो. चो. लो

अबजद, हव्वज़, हुत्ती, कलमन्—इत्येवमन्यापि काचिदबजद-नाम्नी वर्णमातृकाऽऽसीत् । तस्या आर्यैरपरिग्रहादिह त्यागः ॥*॥

इति पञ्चमः खण्डः ॥५॥

वर्णनिर्देशादिपरिशिष्टविचारः षष्ठः खण्डः ॥६॥

अवयवपरिच्छेदो मात्रा । ध्वनिपरिच्छेदानां वर्णत्वमिति वर्णात्मिका परिच्छित्तिर्मात्रिका भवति । उच्चारणसामान्यान्मातृका । अपि वा जनन्यां मातृशब्दः प्रसिद्धः । जनयित्री हीयं वर्णमाला तत्तद्देशभाषाणामिति मातृकाख्यायते ।

भाषायां प्रथमतः प्रवृत्तायां कालेन तत्र वाक्यानि, वाक्ये च पदानि, पदे च वर्णाः विभज्य परिगृहीता अभवन् । तत्र तत्तद्वर्णादिपदविशेषेण तत्तद्वर्णसंज्ञा प्रथमयुगे प्रवृत्ताऽऽसीद् । यथा "रेफः" इत्यधमवचनेन पदेन रस्य संज्ञाऽक्रियतेति प्रथमः कल्पः ॥१॥

तत इति शब्दो वर्णसंज्ञाकरणः प्रवृत्तोऽभूदिति कात्यायनादयः प्राहुः । यथा—"**निर्देश इतिना**"—(१।३६।) इति । एत्यकारस्य । विति वकारस्य । डिति डकारस्य । ईतीकारस्य । सोऽयं द्वितीयः कल्पः ॥२॥

ततः कारशब्दो वर्णसंज्ञाकरणः समपद्यत। **"कारेण च। अव्यवहितेन व्यञ्जनस्य"** १।३९। इति कात्यायनोक्तेः। अकारः ककारः इत्यादि। सोऽयं तृतीयः कल्पः संप्रति प्रचरति। **"र एफेनच"** इति सूत्रयन्तस्तु ते रकारं रेफशब्देनापि व्यपदेष्टुमिच्छन्ति। पदेषु वर्णाव्याकरणस्य सर्वतः पूर्वं रेफशब्देनैवारम्भणात्। तत्स्मरणार्थं रवर्णाभिज्ञानस्य माङ्गलिकस्य रेफशब्देनैव विवक्षितत्वात्। यत्तु—**"स्वरैरपि"**—(का. प्रा. १।४०।) इति कात्यायनादयः प्राहुः। तत् सर्वभाषासाधारणमनुशासनं भवति। तथाहि नागरीभाषायां तावत्–क. ख. ग. घ. ङ–इत्यकारेण वर्णा निर्दिश्यन्ते। इंग्लिशभाषायाम्–ए वि सि डि इत्यादिष्विकारेण, जे के-इत्येकारेण वर्णानां संज्ञा क्रियते॥ पृष्ठतोऽप्ययमेकारः क्वचिन्निर्दिश्यते। एफ् एल् एम् एन्. एस्. एक्ष.–इति। आकारोऽपि क्वचिद् यथा–आर–इति॥ पारस्यानभाषायामेकारो यथा–बे. पे. ते. टे. से–इत्यादि। अलिफ-शब्दस्तु–"अलिपि इत्यस्यापभ्रंशमात्रम्। जीम्. मीम्. स्वाद. सीन–इत्यादयस्तु संस्कृतरेफशब्दवत् प्राचीनसंप्रदायसिद्धाः पदाभिज्ञानोपपन्ना वर्णसंज्ञा द्रष्टव्याः। ते च शब्दा रेफवन्माङ्गलिका इति भाव्यम्॥

इति षष्ठः खण्डः ॥६॥

इति मधुसूदनविद्यावाचस्पतिप्रणीते पथ्यास्वस्तिग्रन्थे मातृकापरिष्कारः प्रथमः प्रपाठः समाप्तः ॥१॥

यमानुवाके विच्छेदप्रतिपत्तिः आगमप्रतिपत्तिश्च ॥२॥

अथ यमपरिष्कारो

द्वितीयः प्रपाठकः

अथातः प्रागुक्तो यमः पुनरिह वैशद्येन चिन्त्यते । शुद्धजित्-सोष्मजितौ द्वौ, शुद्धधिसोष्मधी द्वाविति चत्वारो यमाः । ते च कुं. खुं. गुं. घुं. शब्दैः संज्ञायन्ते । यमस्वरूपे चतुर्धा विप्रतिपद्यन्ते ।

१ एकस्मिन् वर्णे पूर्वाक्षरपराक्षयोर्युगपद्बलसंप्रसक्तौ बलद्वयविप्रतिषेधाद् वर्णो द्विरुच्यते । तत्र द्वितीयस्यानुनासिकपरत्वे नासिक्यत्वमतस्तत्र यमशब्दः । पूर्वस्य निरनुनासिकतयाऽनुनासिकस्यैतस्य प्रयत्नान्तरग्रहणार्थं मध्ये किञ्चिद्विच्छेदलाभात् । विच्छेदयमयोरैकार्थ्यात् ॥ प्रयत्नान्तरत्वं तु पूर्वस्पृष्टविलक्षणं संवृतत्वम् । तथा चाह मण्डूकः—

वर्णानां तु प्रयोगेषु करणं स्याच्चतुर्विधम् ।
संवृतं विवृतं चैव स्पृष्टमस्पृष्टमेव च ॥१॥
स्पर्शानां करणं स्पृष्टमन्तःस्थानामतोऽन्यथा ।
यमानां संवृतं प्राहुर्विवृतं तु स्वरोष्मणाम् ॥२॥इति ।

अत्र पक्षे यमो वर्णागमः सशरीरः पूर्वसदृशो वर्णविशेषः ॥

स्वरात् संयोगपूर्वस्य द्वित्वाज्जातो द्वितीयकः ॥
तस्यैव यमसंज्ञा स्यात् पञ्चमैरन्वितो यदि ॥१॥

इति वर्णरत्नप्रदीपिकाशिक्षोक्तेः । "अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वगुणः"—इत्यौदव्रजिसूत्राच्च । तस्य विंशतिसंख्यत्वेऽपि शुद्धजित्व-सोष्मजित्व-शुद्धधित्व-सोष्मधित्वैः संग्रहणाच्चतुष्ट्वं नोपहन्यते । इत्येका प्रतिपत्तिः ॥१॥

२ परे त्वाहुः—पदद्वयमध्ये यतिर्विवृतिरर्द्धमात्राकालः । दशरा-मशरा इत्यत्र शमयोरुत्तरं विप्रकर्षविशेषानुभवात् । सदा स आयाती-

त्यत्र प्रथमसद्विरतावन्योऽर्थः दाक्षरादन्योऽर्थः ।

काकाली कामधुरा काशीतलवाहिनी गङ्गा ॥

कंसं जघान कृष्णः कम्बलवन्तं न बाधते शीतम् ॥

इत्येतेषु तत्र तत्र यतिवैशेष्यादेवैतानि प्रश्नवाक्यान्युत्तरवाक्यरूपायोपकल्पन्ते ॥

कागदही की आस में बंठे निपट उदास

कागदही पाये बिना मिटे न मन की प्यास ॥१॥

इह भाषापद्ये पदान्तविरतित्रयभेदादर्थत्रयमुपपद्यते ॥

तथा च—"सक्रतु" रित्यत्र ककारपृष्ठे सा विरतिरुपपद्यते । सऽक्रतुः । अथ कदाचित् सा ककारात् पुरतो विक्षिप्यते । पराङ्गेऽपि ककारे पूर्वाक्षरबलाक्रमणे न पूर्वसन्निकर्षातिशयोपपत्तेः । परबलशैथिल्यात्तु-कस्य पराङ्गत्वं व्याहन्यते । तेन सऽक्रतुरितिवक्तव्ये सक्ऽरतुरित्युच्चारः । अथ बलद्वयविप्रतिषेधे कस्य द्वित्वमिति कद्वयान्तराले सा विरतिर्निक्षिप्यते । सक्ऽक्रतुरिति । नक्तमित्यादौ पदविरत्यभावेऽप्यक्षरद्वयान्तरालविरत्या त्रैविध्यमुपपद्यते—न-क्तम् । नक्-तम् नक्-क्तमिति । अथानुनासिकपरत्वे तच्छायापत्त्या विरतेरस्या नासिक्यत्वं प्रसज्यते । तस्याश्च यमसंज्ञा । अत्र पक्षे यमः शरीरशून्यो विच्छेदात्मा ।

जकारौ द्वौ मकारश्च रेफस्तदुपरि स्थितः ॥

अशरीरं यमं विद्यात् संमाज्मौति निदर्शनम् ॥१॥ इति

अमोघनन्दिनीशिक्षोक्तेः ॥ "अन्तःपदेऽपञ्चमा पञ्चमेषु विच्छेदम्" (१३६) इति प्रातिशाख्यसूत्रं व्याचक्षाणे **प्रदीपे विच्छेद इति यमसंज्ञा** इत्युक्तेश्च । स्वरयोर्विच्छेदे विवृतिशब्दः । व्यञ्जनयोर्विच्छेदे यमशब्द इति व्यावहारिकसमयः । हरऽएहीति विवृतिः । पलिक्ऽक्नीति यमः । यमस्य विच्छेदमात्रत्वेऽपि पूर्वव्यंजनचातुर्विध्यनिबन्धनं चतुष्ट्वमुपचर्य्यते । इत्यन्या प्रतिपत्तिः ॥२॥

३. अन्ये त्वाहुः । **संयोगविभागशब्देभ्यः शब्दोत्पत्तिरिति** भगवान् कणादः प्राह । दृश्यते च—ऊर्क्-क्, हरित्-त्, फट्-ट् इत्यादौ

व्यञ्जनान्तपदविरामे पदान्तव्यञ्जनोच्चारणार्थं वेगात् क्रियमाणे स्थान-करणसंयोगे संयोगजो वर्णः सद्यः प्रतिभासते। अथ शैथिल्येन तत्संयो-गोपरमे वर्णान्तरानुत्पत्तावपि सद्यस्तरसा तत्संयोगप्रत्याकर्षे विभागजस्तत्र पूर्वसदृशो वर्णः प्रादुर्भवति। पदविरामवत् पदमध्येऽपि संयोगादेर्विच्छिद्योच्चारणे संयोगजवर्णोत्तरं स विभागजो वर्णः संभवति। एष एव तु सोष्मरहवर्जं सर्वत्र वर्णद्वित्वहेतुर्द्रष्टव्यः। स विभागज एवानुनासिकपरत्वे तत्प्रयत्नाकृष्टतया नासिक्यतां प्राप्तो **यम** उच्यते। पलिक्-क्नीति। सक्थ्-थ्नेत्यादौ ककारादप्यग्रे थकारे विराम इति तस्यैव विभागजत्वे यमसंज्ञा ॥

द्विरुक्तिं वर्जयेन्नित्यं यमेऽपि परतः स्थिते ॥
सक्थ्ना देदिश्यते नारी ककारोऽत्रैक एव हि ॥१॥ इति

वर्णरत्नप्रदीपिकायां कद्वित्वनिषेधात् ॥ **"सर्वेषां व्यञ्जनानां द्विर्भावो-भवति द्वादशवर्जम्" । ते ख छ ठ थ फा घ झ ढ ध भा रहौ चेति–"** गौतमसूत्रमते तु—**थ**-घटकस्य तस्य द्विरुक्तिरिति विशेषः ॥ **"प्रथमैर्द्वितीयास्तृतीयैश्चतुर्थाः"** ॥१३९॥ इति कात्यायनप्रातिशाख्य-सूत्रे तथोक्तेः। तदित्थं विंशतिर्यमाः ॥३॥

॥ इत्यन्या प्रतिपत्तिः ॥३॥

अपरे त्वाहुः—न विंशतिर्यमाः किन्तु क. ख. ग. घ. सदृशध्वनयो नासिक्याश्चत्वार एव यमाः कुं. खुं. गुं. घुं. संज्ञाः। आतनच्मीत्यत्रा-त्तनच्क्मीति। संमार्ज्मीत्यत्र संमार्ज्-ग्मीति। आट्णोत्पत्र आट्. क्णोति। रत्नमित्यत्र रत्-क्नमिति। सक्थ्नेत्यत्र सक्थ्-ख्नेति। विघ्न इत्यत्र विद्-ग्म इति। दध्म इत्यत्र दध्-घ्म इति। पाप्मेत्यत्र पाप्-क्मेत्यु-च्चारणात् ॥ एतदुक्तं पाणिनीयशिक्षाभाष्ये शिक्षाप्रकाशे "अन्तर्वत्क्नीति तकारयमककारनकारेकाराः ॥ यञ्ज इत्यत्र जकार-पूर्ववर्ण-वर्गसंख्य-सवर्णयमगकार-ञकारा इति ॥ शिक्षाभाष्यानुमत्यैतदुच्चारणमाख्यातम्। वस्तुतस्तु कुंकार-गुंकारयोः कवर्ग्यतया तत्स्थानचवर्ग्यस्थानयोरानन्तर्यात् पूर्वप्रयत्नापकर्षेण यमे प्रत्यये चवर्ग्यः कवर्ग्यत्वमापद्यते। उक्तं च भगवता

पाणिनिना—"**चोः कुर्झलि पदान्ते चेति**"॥ तेन आतनच्च्मीतिवक्तव्ये कुंकारादातनच्क्मीति; ककारयमककारमकाराः। संमार्ज्मीत्यत्र गुंकारात् संमाग्ग्मींति; गकारयमगकारमकाराः। यज्ञ इत्यत्र गुंकारात् यग्ग्ञ इति। विज्ञानमित्यत्र च विग्ग्ञानमिति गकारयमगकारञकाराः॥ इतीत्थमेव सर्वत्रोच्चारणं संप्रदायसिद्धमवकल्पते॥

ज्ञानमित्यत्रापि मध्ये गुंकारो नियम्यते। (१) "**ः अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वगुणः**"—इत्यौदव्रजिसूत्रात् ॥१॥

(२) **अनन्त्यान्त्यसंयोगेऽनन्त्यपूर्वेऽन्त्योत्तरे व्यवधानवर्जिते तत्र यमा वर्तन्ते न संशयः।**" इति गौतमसूत्राच्च ॥२॥

(३) अनन्त्यश्च भवेत्पूर्वो ह्यन्त्यश्च परतो यदि॥
तत्र मध्ये यमस्तिष्ठेत् सवर्णः पूर्ववर्णयोः। इति नारदोक्तेश्च।

(४) अपञ्चमैश्चैकपदे संयुक्तं पञ्चमाक्षरम्॥
उत्पद्यते यमस्तत्र सोऽङ्गं पूर्वाक्षरस्य हि॥४॥

(५) पञ्चमाः शषसैर्युक्ताः अन्तस्थैर्वापि संयुताः॥
यमास्तत्र निवर्तन्ते श्मशानादिव बान्धवाः॥५॥
इतियाज्ञवल्योक्तेश्च

(६) स्पर्शानामुत्तमैः स्पर्शैः संयोगाश्वेदनुक्रमात्॥
आनुपूर्व्यां यमांस्तत्र जानीयाच्चतुरस्तथा॥६॥

इति मण्डूकोक्तेश्च॥६॥ तस्य गुंकारस्य झल्त्वाज्जकारो गत्वमापद्यते। तेन ज्ञानमिति गकारगुंकारञकारा इति उच्चारणसंप्रदायो वैदिकानुमोदितो लोकेऽपि प्रयुज्यते। घृवातोवैदिकस्य घृतादिष्ठ लोकेऽपि प्रयोगवत्॥ यत्तु ज्ञानं विज्ञानमित्यादावेक एव गकारः प्रतिभाति न तु गुंकारः पृथक् प्रतीयते। अप्रतीतश्च नास्तीति शक्यं वक्तुमिति कश्चिद् ब्रूयात्। तन्न। पूर्वस्पर्शयमयोः संयोगस्यायस्पिण्डतया घनबन्धात् पार्थक्येनाप्रतीतावपि प्रकृतिसिद्धार्थस्यापलापानर्हत्वात्।

त्रिविधो हि पिण्डः स्मर्य्यते भगवता गौतमेन—

त्रिविधः संयोगपिण्डो भवति—अयस्पिण्डो दारुपिण्डस्तथोर्णापिण्डश्चेति । यमसहितमयपस्पिण्डम् । दारुपिण्डमन्तःस्थैर्युक्तम् । यमान्तःस्थवर्जं तूर्णापिण्डमिति ॥

अन्तःस्थयमसयोगे विशेषो नोपलभ्यते ।

"अशरीरं यमं विद्यादन्तःस्थः पिण्डनायकः" इति

अशरीरत्व पूर्वस्पर्शशरीरान्तःप्रविष्टत्वम्, अत एव च पूर्वस्पर्शयमयोर्म्मध्ये विच्छेदो नोपलभ्यते ॥ तस्मात् पार्थक्येनाप्रतीतिरिति बोध्यम् ॥ इति प्रासङ्गिको यमविचारः ॥*॥

इति मधुसूदन--विद्यावाचस्पति--प्रणीते
पथ्यास्वस्तिग्रन्थे यमपरिष्कारो द्वितीयः प्रपाठः
समाप्तः ॥२॥

——

तृतीये गुणानुवाके सप्तमखण्डे वाक्चातुर्विध्यखण्डः प्रथमः ॥१॥

॥ अथ गुणपरिष्कारस्तृतीयः प्रपाठः ॥

धर्म्मादभ्युदयः सदाऽभ्युदयते धर्मस्तु साहित्यतो
विज्ञेयोऽप्यविनाकृतं तदपि वा वाक्यैश्च वाक्यं पुनः ॥
संपद्येत पदैः पदं पुनरिदं वर्णैः कृतं वर्ण्यते
ते वर्णाश्च गुणैः कृता इति गुणान् वर्णाहितान् ब्रूमहे ॥११

(१) येयं वाग्वदति सा चतुर्विधा विज्ञायते । तथाच श्रूयते–
"चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः" ॥
"गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति"॥१इति॥

वाचा परिच्छिन्नानि तावच्चत्वारि स्थानानि भवन्ति—वाचस्पत्यं, ब्राह्मणस्पत्यमैन्द्रं भौमं चेति। स्थानभेदाद्वाचश्चतुर्विधा उपपद्यन्ते-वेकुरा, सुब्रह्मण्या, गौरिवीता, आम्भृणी चेति । स्वायम्भुवमण्डले परमाकाशे वेकुरा वाक् ॥१॥ पारमेष्ठ्यमण्डले महासमुद्रे सुब्रह्मण्या वाक् ॥२॥ सौरमण्डले महाब्रह्माण्डे गौरिवीता वाक्॥३॥ पार्थिवमण्डले भौमाण्डे चान्द्रमण्डलोपेते सोममयी आम्भृणी वाक् ॥४॥ ता एता वाचस्तत्तल्लोकस्थितानां सर्वेषां भावानामुपादानभूता इष्यन्ते । तत्रेयमाम्भृणी वागस्यां भूमौ सर्वत्राभिव्याप्ता । तामेव वाचमिमे मनुष्या उपजीवन्ति । इतरास्तु तिस्रो वाचो गुहायां निहिताः । तदुक्तमृषिणा—

बृहस्पते प्रथमं वाचो अग्रं यत् प्रैरत नामधेयं दधानाः ॥
यदेषां श्रेष्ठं यदरिप्रमासीत् प्रेणा तदेषां निहितं गुहाविः"॥इति॥

ऋक्सामयजुरात्मिका वैदिकी हीयं वाक् सर्वेषामाविरेव सती गुहायां निहिता न सम्यक्तया परिज्ञायते इत्यर्थः । ता ह्येताश्चतस्रो वाचो ब्रह्मविज्ञाने सुविशदं व्याख्याता द्रष्टव्याः ॥१॥ अपि चान्यथा ब्रूमः–

(२) वाजस्य हि प्रसवो वागियं श्रूयते । यथोक्तं मैत्रायणीयश्रुतौ—

"वाग्घि वाजस्य प्रसवः । सा वै वाक् सृष्टा चतुर्धा व्यभवत् । एषु लोकेषु त्रीणि तुरीयाणि । पशुषु तुरीयम् । या पृथिव्यां, साग्नौ, सा रथन्तरे ॥१॥ याऽन्तरिक्षे, सा वाते, सा वामदेव्ये ॥२॥ या दिवि सा बृहति; सा स्तनयित्नौ ॥३॥ अथ पशुषु ॥४॥ ततो या वागत्यरिच्यत तां ब्राह्मणे न्यदधुः । तस्माद्—ब्राह्मण उभयीं वाचं वदति—यश्च वेद, यश्च न । या बृहद्रथन्तरयोः—यज्ञादेनं (वाजं) तया गच्छति ॥ या पशुषु तया ऋते यज्ञम् ॥

वाजस्येमं प्रसवः सुषुवेऽग्रे सोमं राजानमोषधीष्वप्सु ॥
स विराजं पर्य्येतु प्रजानन् प्रजां पुष्टिं वर्धयमानो अस्मे ॥१॥
वाजस्येमां प्रसवः शिश्रिये दिवं स ओषधीः समनक्तु घृतेन ॥
वाजस्येदं प्रसव आबभूवेमा च विश्वा भुवनानि सर्वतः ॥२॥

मैत्रि. ब्रा. १।११।४–५) इति ॥

अत्रेयं त्रिलोकीवाग् गुहानिहितेव नेङ्गयते, पशुवागियमनुभूयते इति विद्यात् ॥२॥ अपि चान्यथा ब्रूमः—

(३) अमृता, दिव्या, वायव्या, ऐन्द्री चेति सा चतुर्धा वाक् । तत्र मनःप्राणगर्भिता सत्या वागमृता । वेदा हि ऋक्सामयजूंष्यमृता वाक् । ततः सर्वमिदं प्रजायते, तत्र प्रतितिष्ठति, तत्र संतिष्ठते । सेयं वागाकाशो नाम । अग्निरस्या ब्रह्म । अग्निरस्या उपनिषत् । तस्मादियमाग्नेयी । सेयं मन्त्रे श्रूयते—

"गौरीर्मिमाय सलिलानि तक्षती एकपदी द्विपदी सा चतुष्पदी ॥
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥१॥(१।१६४।४१)

अथ दिव्या वागृता, सोऽथर्ववेदः । तन्मयान्येवैतानि सर्वाणि दैवतानि भूतानि चोत्पद्यन्ते—

इयं या परमेष्ठिनो वाग्देवी ब्रह्मसंशिता ॥
येनैव ससृजे घोरं तेनैव शान्तिरस्तु नः॥ ॥ (१६।६।३।)

इत्यथर्वसंहितोक्तेः॥

सेयं वाक् सरस्वान्नाम । दिक्सोमोऽस्या ब्रह्म । दिक्सोमोऽस्या उपनिषत् । तस्मादियं सौम्या । सेयमपि श्रूयते—

"तस्याः समुद्रा अधिविक्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः ॥
ततः क्षरत्यक्षरं तद्विश्वमुपजीवति ॥२॥ (१।१६४।४२)
वागक्षरं प्रथमजा ऋतस्य वेदानां माताऽमृतस्य नाभिः ॥
सा नो जुषाणो यज्ञमागादवन्ती देवी सुहवा मे अस्तु ॥इति॥

अनयोर्ध्वनिर्नास्ति । तस्मान्नैते श्रोत्रेण गृह्येते । ध्वनिः शब्दः । ध्वन्य-भावात्तु नैते वाचौ शब्दौ भवतः ।

"वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्म्ममे ।" इति मनुस्मृति-वाक्ये शब्दपदमौपचारिकं बोध्यम् । अशब्दात्मिकाया एव त्वमृताया वेदवाचः सृष्टिहेतुत्वसिद्धान्तात् ॥

श्रोत्रग्राह्यो ध्वनिर्द्विविधः । शक्त्यभावादनर्थकः प्रथमः । वर्णपद-वाक्यादिविभाजितः सार्थको द्वितीयः । उक्तं च—

ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयम् ॥
यस्याः सूक्ष्मादिभेदेन वाग्देवीं तामुपास्महे ॥१॥इति

तत्रानर्थिकाया वाचो वायुर्ब्रह्म । वायुरुपनिषत् । तस्मादियं वायव्या । गतिविहीनापीयं वाग् वाय्वारब्धा वायुप्रतिष्ठा वायु-नैवेतस्ततो नीयते । नादश्वासादयश्च तस्यां विशेषा वायुनैवोपपद्यन्ते । सेयं सरस्वती नाम तृतीया वाक् विश्वोपजीवनी भवति । सापि प्रथमाद्वितीयावदव्याकृतैवासीत् । अर्थनिबन्धनस्य वर्णादि-विभागस्य तत्रादृष्टत्वात् । तस्यां चेन्द्रोऽनुप्रविश्य विभक्तिभिस्तां विविधैराकारैर्व्याकरोति तेनेयमैन्द्री व्याकृता वाग् भवति । तथाच श्रूयते—

"वाग् वै पराच्यव्याकृताऽवदत् तद् देवा इन्द्रमब्रुवन्—इमां नो वाचं व्याकुरु इति । सोऽब्रवीद्-वरं वृणै—मह्यं चैवैष वायवे च

सह गृह्याता इति । तस्मादैन्द्रवायवः सह गृह्यते । तामिन्द्रो मध्यतोऽपक्रम्य व्याकरोत् । तस्यादियं व्याकृता वागुद्यते" इति ।

सोऽयमर्थो मन्त्रसंहितायामप्याम्नायते—

"बीभत्सूनां सयुजं हंसमाहुरपां दिव्यानां सख्ये चरन्तम् ॥
अनुष्टुभमनु चर्चूर्यमाणमिन्द्रं निचिक्युः कवयो मनीषा" ॥
(१० । १२४ । ६) इति ।

एष मन्त्रोऽक्षरप्रकरणे व्याख्यास्यते । सा हीन्द्रेण व्याकृतैवेयं वागुपयुज्यते सर्वेभ्यो व्यवहारेभ्यो वैदिकेभ्यश्च लौकिकेभ्यश्च । तथा च श्रूयते मन्त्रः—

"वाचं देवा उपजीवन्ति विश्वे वाचं गन्धर्वाः पशवो मनुष्याः ॥
वाचीमा विश्वा भुवनान्यर्पिता सा नो हवं जुषतामिन्द्रपत्नी ॥१॥

इत्थं चैताश्चतुर्विधा वाचो व्याख्याताः । तत्रैताः पूर्वास्तिस्रोऽर्थविज्ञानाननुकूलत्वाद् गुहा निहिता नेङ्गयन्ति न कंचिदर्थं संकेतयन्ति ॥ अथ यां पुनरिमां वाचं मनुष्या ब्रुवते; यस्यां वाच्यकारककारादयो वर्णाः व्याकृताः संविभक्ताः प्रज्ञाता दृश्यन्ते । सेयं चतुर्थी व्याकृता वागैन्द्री नाम प्रतिपत्तव्या । इन्द्रः प्रज्ञाप्राणः । प्रज्ञानयोगात्तु वाचो विभज्यमाना वर्णा भवन्ति । अ उ इति मनःप्राणयोः संज्ञे वैज्ञानिकानाम् । तत्र मनः प्रज्ञानमृणः प्राणो ध्वनिरर्णः । अपि वा प्राणं च प्रज्ञानं चागतो ध्वनिर्वर्णः ॥ वर्णा एवामी अर्णा इत्युच्यन्ते । प्रज्ञाप्राणयोर्नान्तरीयकतया प्रज्ञयैव प्राणस्यापि संग्रहीतुं शक्यत्वात् ॥ यास्तु वाचोऽनाहतनादे(१), याश्च वाचो वाय्वग्निजलपार्थिवानाम्(२), या वा वाचः पशुपक्षिसरीसृपाणाम्(३)। या वा वाचः सद्योजाताशिक्षितशिशुरोदनादिषु ताः सर्वा इन्द्रेण अव्याकृतत्वादनिरुक्ताः केवलवायव्या इष्यन्ते ॥ मनुष्याणामेव तु वागर्थगर्भितत्वान्निरुक्तं प्रज्ञातमुच्यते । तस्मादयमैन्द्रवायवो ग्रहो भवति ॥४॥

(४) सेयमैन्द्री वागध्यात्मं चतुर्धा विधीयते । तथा च मन्त्रः श्रूयते—

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ॥
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥१॥इति

परा, पश्यन्ती, मध्यमा, वैखरी, इत्येता हि ता अध्यात्मं चतुर्धा वाचः ।

न सोस्ति प्रत्ययो लोके यः शब्दानुगमादृते ॥
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥१॥

इत्याप्तोक्ते बुद्धिस्था वाक् परा । मनसा ग्रन्थाक्षरानाकलयतामुपांशु वाक् पश्यन्ती । विनैव नादध्वनिं श्वासमात्रेण कर्णमनुच्चार्यमाणा वाग् मध्यमा ।

नादध्वनिशालिनी दूरतोऽपि श्रोत्रग्राह्या वैखरी ॥ तासु परापश्यन्तीमध्यमाः प्रच्छन्ना न विशिष्यावगम्यन्ते ॥ वैखरीं तु मनुष्या ब्रुवते । उक्तं चाभियुक्तैः—

वैखरी शब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा ॥
द्योतितार्था तु पश्यन्ती सूक्ष्मा वागनपायिनी ॥१॥ इति ॥४॥

(५) सेयं वैखरी पुनरध्यात्मं चतुर्धा विधीयते तथा च श्रूयते—

चत्वारि वाक् परिमिता पदानि तानि बिदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदंति ॥१॥इति

तमेतं मन्त्रं वाजसनेयश्रुतिरित्थं व्याचष्टे—

"इन्द्रो ह वा ईक्षांचक्रे-'वायुर्वैनोऽस्य यज्ञस्य भूयिष्ठभाग् । हन्तास्मिन्नपि त्वमिच्छा" इति । स होवाच वायवा मास्मिन् ग्रहे भजेति । किं ततः स्यादिति । निरुक्तमेव वाग् वदेदिति । निरुक्तं चेद् वाग् वदेत् आ त्वा भजामीति । तत एष ऐन्द्रवायवो ग्रहोऽभवत् ।

तदेतत् तुरीयं वाचो निरुक्तं यन्मनुष्या वदन्ति । अथैतत् तुरीयं वाचोऽनिरुक्तं यत् पशवो वदन्ति। अथैतत् तुरीयं वाचोऽनिरुक्तं यद्वयांसि वदन्ति। अथैतत् तुरीयं वाचोऽनिरुक्तं यदिदं क्षुद्रं सरीसृपं वदति ॥ इति ।

न केवलमध्यात्मं, किन्तु यदधिभूतं, यदधिदैवतं वा वाक् तत्राप्येते चत्वारो विभागा द्रष्टव्याः । परा पश्यन्ती मध्यमा वैखरीति ॥

(६) सेयं या वैखरी वाग् मनुष्येण व्याह्रियते तत्रापीयं श्रुतिर्भवति

"चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥१॥इति।

प्राण स्वरः, वर्णः, ध्वनिः—इत्येवं तावमनुष्यवाचश्चत्वारि पदानि । तथा हि—

आत्मा बुद्ध्या समर्थ्यार्थान् मनो युङ्क्ते विवक्षया ॥
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ।
सोदीर्णो मूर्द्धन्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः ॥

इति शिक्षास्मृत्युक्तमार्गेण नाभ्युत्थितो वायुः स्वरात्मतासिद्धेः प्राक् प्राणो नामाभिसंधेयः । अथ स एवैतन्मुखागमनात् प्राक् उरःकण्ठशिरःस्थानः स्वरः । स पुनः पञ्चरूपैः पञ्चाशद्रूपैश्चतुःषष्टिरूपैरपि वा व्याक्रियमाणो वर्णः। स पुनः षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाख्यैः सप्तभिः स्वरैर्विभेदितः श्रुत्या गृहीतो ध्वनिर्नाम जायते। तत्र प्राणोऽयमेकस्तरमात्रा वाक् । अथान्यवाक्स्तरयोगाद् द्विस्तरा स्वरवाक् । तत्रान्यवाक्स्तरयोगात् त्रिस्तरा वर्णवाक् । तत्र पुनरन्यवाक्स्तरयोगाच्चतुस्तरा ध्वनिवाक् । नानपेक्ष्य पूर्वामुत्तरारूपं धत्ते ॥

अत्राहा शङ्करो भाष्यकारः। कः पुनरयं ध्वनिर्नाम। यो दूरादाक-

र्णायतो वर्णविवेकमप्रतिपद्यमानस्य कर्णपथमवतरति। प्रत्यासीदतश्च मन्दत्वपटुत्वादिभेदं वर्णेष्वासञ्जयति। तन्निबन्धनाश्चोदात्तादयो विशेषा न वर्णस्वरूपनिबन्धनाः। वर्णानां प्रत्युच्चारणं प्रत्यभिज्ञायमानत्वात् ॥१॥

अथैते वर्णा ध्वनिसहकारेण च कृतरूपा भवन्ति ध्वनिमन्तरेण च। यौ तावत् कर्णे प्रत्यासीदन्तौ रहस्यमुपजल्पतस्तयोर्भाषायां वर्णा उपांशुकृतत्वाद् ध्वनिविनाकृता अपि लक्ष्यन्ते। उच्चैःकृतायामेव ध्वनेः संचारात् ॥२॥

अथ यदाहुः—"अकारो वै सर्वा वाक्। सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवतीति"(ऐ. ब्रा॰ · ·) तत्रेयं स्पर्शोष्मयोगप्रतियोगिनी वाक् स्वरो नाम। एष एव स्वरो लघुत्वगुरुत्वाभ्यां द्वेधा प्रतिपद्यमानोऽक्षरो नाम कथ्यते ॥३॥

अथ यं पुनरेते शाब्दिकाः स्फोटं प्रतिपद्यन्ते स प्राणो वर्णानां मूलाधारो द्रष्टव्यः। तदवच्छेदादिमे वर्णाः परस्परतो नोपसृज्यन्ते ॥४॥

अथ पुनर्देवताभिश्चैता वाचो विभक्ता द्रष्टव्याः। ध्वनिरयमग्नीषोमीया वागाग्नेयी गायत्रीछन्दा इष्यते। वर्णात्मिका तु वाग् वायव्या अनुष्टुप्छंदा भवति। **"वाचमष्टापदीमहमिति श्रुतेः" ब्रह्म वै गायत्री वागनुष्टुप्** इति श्रुतेश्च"—॥अष्टौ हि बिन्दवस्तस्या व्याप्तिस्थानमित्यनुष्टुप्त्वमुपपद्यते। या पुनः स्वरवाक् तामैन्द्रीं बृहतीछन्दसमाहुः। "**वागिन्द्र**" इति हि श्रुतिरेतामेवैन्द्रीं वाचमभिप्रैति। इयमेवेन्द्रपत्नीति श्रूयते। तस्या नव बिन्दवो व्याप्तिस्थानमिति बृहतीछन्दस्त्वमाहुः॥ प्राणस्त्वयं स्फोटोऽव्ययभक्तिर्वाक्। स हि कोशः सर्वासां वाचामिष्यते। तदित्थमेषा चतुष्टयी वाक् संहितोपचर्य्यते। तस्यास्तुरीयमेव पदमेतं ध्वनिमद्धा शृण्वन्ति ॥

अथैषा चतुष्टयी वाक् पुनरन्यथा चातुर्विध्यं भजते। तद्यथा वर्णः, अक्षरं, पदं, वाक्यम्—इति हि मनुष्यवाचश्चत्वारो विभागा भवन्ति।

इदमेवैतस्या वाचश्चातुर्विध्यमिन्द्रेण कृतं व्याकरणमाख्यायते। तत्र वाक्यानि पदैः, पदान्यक्षरैः, अक्षराणि वर्णैः कृतरूपाणि भवन्तीत्यतस्तानि वर्णाक्षरपदानि त्रीण्यन्तरतः प्रवेशक्रमाद् गुहानिहितानि न स्वातन्त्र्येण शाब्दबोधं जनयन्ति। वाक्यस्यैवार्थबोधने सामर्थ्यलाभात्। तस्मादर्थं प्रत्याययितुं वाक्यानि मनुष्या ब्रुवते ॥६॥

(७) अथ वर्णोऽक्षरं, पदं, वाक्यमित्येतेषामपि चतुर्णां प्रत्येकस्य पुनश्चातुर्विध्यमिच्छन्ति। तत्र तावद्वर्णश्चतुर्धा—अस्पृष्टः, ईषत्स्पृष्टः, स्पृष्टः, अर्द्धस्पृष्ट इति भेदात् ॥१॥ अक्षरं चतुर्धा पूर्वापरोभयविधव्यापारशून्यं प्रथमम्—अ इति ॥ पृष्ठव्यापार-विशिष्टं, पुरतो व्यापारशून्यं द्वितीयम्—स्म इति ॥ पृष्ठव्यापार-शून्यं, पुरतो व्यापारविशिष्टं तृतीयम्—ऊक्—इति ॥ उभयतो व्यापारविशिष्टं चतुर्थम्—वागिति ॥२॥

अथ पदं चतुर्धा नामाख्यातोपसर्गनिपातभेदादिति भगवान् पतञ्जलिः ॥ परे त्वाहुः। नोपसर्गः पृथक् पदम्। उपसर्गविशिष्ट-स्याख्यातत्वात्, तस्य तत्रैवान्तर्भावात्। येषु तु—"**इन्द्रो देवान् प्रतिप्रतिः।**" "**अतीनि ह कर्म्माणि सन्ति। यान्यन्यत् कर्म्माणि, तान्यतीनि**" **इदानीनि, एतर्हीणि** ॥ इत्यादिषु विभक्तयः प्रयुक्ता दृश्यन्ते तेषां नामत्वमेवोपपद्यते ॥

तस्मान्नामाख्यातनिपातेभ्योऽतिरिक्तानां विभक्त्यर्थगर्भितत्वाद् विभक्त्ययोग्यानां स्वरादिशब्दानां चतुर्थत्वं द्रष्टव्यम्। नैतानि नामानि। विभक्त्यर्थागर्भिततया विभक्तियोगिनामेव नामत्वेन विवक्षितत्वात् ॥३॥ अथार्थवैशिष्ट्यात् प्रज्ञानोपपन्ना वाग् वाक्यम् ॥ तच्चतुर्धा—नाभिस्थानं, प्रक्रमत्रयस्थानं, मुखप्रदेशपञ्चकस्थानं, श्रोत्रस्थानं चेति ॥ प्रज्ञानप्रेरिता सती नाभेरारभ्य परश्रोत्रमागता परस्मै प्रज्ञानं जनयतीति चतुर्षु पदेषूपस्थाय विलीयते॥ ॥

(६) वाक्यमेवेदं महदुक्थप्रकारेण पुनश्चतुष्पदमैतरेयारण्यके श्रूयते । मितममितं स्वरः सत्यानृते इति । ऋग् गाथा कुम्ब्या तन्मितम् ॥१॥ यजुर्निगदो वृथा वाक् तदमितम् ॥२॥ सामाथो यः कश्च गेष्णः स स्वरः ॥३॥ ओमिति सत्यं नेत्यनृतम्" इति ॥४॥ सत्यानृतयोः पृथक्त्वाभिप्रायेण पञ्चविधत्वमपीच्छन्ति ॥५॥

यत्तु यास्कनिरुक्ते—"तस्माद् ब्राह्मणा उभयीं वाचं वदन्ति या च मनुष्याणाम्"—(१३।१) इति वाचो द्वैविध्यमाख्यातं तद्वेदभाषा-संस्कृतभाषाभेदाभिप्रायं द्रष्टव्यम् । छन्दोभाषायाः स्वर्गभाषात्वसिद्धान्तात् ॥

एषां च वाक्यानां पदानामक्षराणां च वर्णा एवारम्भकाः सन्तीति सर्वमूलत्वादादौ वर्णाः शिक्षयितव्याः ॥ ते च वर्णाः सप्तनवति-विधाश्छन्दोभाषायां दृश्यन्ते—इत्येतेषामेष समाम्नायस्तावत् प्रदर्शितः॥

॥ इति प्रथमः खण्डः ॥

(१)

——

अथ ब्रूमः । अक्षराणामकारोऽस्मीति स्मरणादकार एवैको वर्णः सर्वेषामेषां वर्णानां प्रतिपत् । अकारादेवैकस्मादक्षरादयमेतावान् वर्णसमाम्नायोऽन्यान्यगुणयोगेनोत्पद्यते । तथा चाह भगवानैतरेयः—

"यो वै तां वाचं वेद यस्या एष विकारः स संप्रतिवित् ॥
अकारो वै सर्वा वाक् । सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी
नानारूपा भवति ॥ (ऐ० आ० २।३।६) इति ॥

अत्र श्रुतौ स्पर्शोष्मशब्दौ स्थानकरणयोरन्योन्यं सन्निकर्षतारतम्यं विप्रकर्षतारतम्यं च यथायथं लक्षयतः । ते च स्थानकरणे द्विविधे बहिरङ्गे चान्तरङ्गे च । मुखप्रवेशात् प्राग्भाविनी बहिरङ्गे ।

तत्र स्थानं प्रक्रमशब्देन, करणप्रयत्नस्त्वनुप्रदानशब्देनाख्यायते । मुखाभ्यन्तरतस्तु ते अन्तरङ्गे भवतः । उभयत्र प्रयत्नविशेषात् स्थानकरणयोराकुञ्चनसंप्रसारणे वर्णस्वरूपविशेषोत्पत्तये भवतः ॥ अथ स्पर्शोष्मशब्देन स्वरद्वयसंश्लेषविश्लेषावपि लक्ष्येते । तेन स्वराणां विश्लिष्टोच्चारणे एकमात्राकालः । संश्लिष्टोच्चारणे तु द्विमात्रस्त्रिमात्रो वा कालः ॥

स्वराणामवयवसंकोचेन घनीभावे व्यञ्जनत्वोपपत्तिः । तत्रैतेषामर्द्धमात्रा कालः । तदित्थं पञ्चैते गुणा एकस्याकारस्यानेकाकारतासंपादकतया वर्णसमाम्नायोत्पत्तिहेतवो भवन्ति । तानेवैतान् पञ्चगुणानुपदर्शयितुमेतं वर्णसमाम्नायं प्रक्रमस्थानतः; कालतः, करणप्रयत्नतः अनुप्रदानप्रयत्नतश्च व्याख्यास्यामः ॥

तत्रादौ प्रक्रमस्थानतो वर्णभेदः प्रदर्श्यते ॥

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।१।१६४।४५

इति भगवान् वेदमहर्षिः प्राह । तथाहि—**प्राणवायुर्वाग्भावाय प्रक्रममाणश्चत्वारि प्रक्रमपदान्यपेक्षते । नाभिम्, उरः, शिरः, आस्यंचेति । नाभिर्हि प्राणवायोः प्रथमं पदम् । ततः प्रक्रम्य स उरसि, कण्ठे, शिरसि वा प्रत्याहन्यमानः** प्रथमं प्रक्रमं समाप्नोति । उरसि कण्ठे वा प्रथमप्रक्रमपूर्तौ ततः प्रक्रम्य शिरसि प्रत्याहन्यमानो द्वितीयं समाप्नोति । शिरःपदात्प्रक्रम्य स मुखे स्थानेष्वाहन्यमानस्तृतीयं समाप्नोति । आस्यपदात् पुनश्चतुर्थे प्रक्रमे वर्णभावेन परिणममानो मुखान्निःसरति ॥

तथा चाह भगवान् पाणिनिः—

आत्मा बुद्ध्या समर्थ्यार्थान् मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥१॥

मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ।
कण्ठे तु मध्यमं शीर्ष्णि तारं जनयति स्वरम् ॥२॥
सोदीर्णो मूर्ध्न्यभिहितो वक्त्रमापद्य मारुतः ।
वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः ॥३॥
स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः ।
इति वर्णविदः प्राहुर्निपुणं तं निबोधत ॥४॥(इति)

तत्र नाभ्युरःशिरांसि त्रीणि पदानि गुहायां निहितानि नाद्धा प्रतीयन्ते । मुखं तु वर्णानामुच्चारणायोपयुक्तं भाति । (१) नाभौ प्राणस्य वायुभावः । (२) उरसि वायोः स्वरभावः । (३) शिरसि स्वरस्य ध्वनिभावः । (४) अथ मुखे ध्वनेर्वर्णभावः । तेनादितस्त्रिषु पदेषु वाचः प्राग्रूपस्य प्राणवायोर्नास्ति वर्णत्वेनाभिव्यक्तिः। तुरीये त्वेव पदे वाचोऽद्धाभिव्यक्तिरिति प्रतीतिगम्योऽर्थः श्रुत्याभिधीयते।

प्रथमं प्रक्रमसंस्थानानामुरः, कण्ठः, शिर इत्येवं त्रैविध्यमाख्यातम् । तच्चेदं बलतारतम्यादुपपद्यते । उच्चिचारयिषया प्रयुक्तः प्राणवायुः कनीयसा बलेन प्रक्रममाणः सन्नुरसि, संप्रतिबलेन कण्ठे, भूयसा तु बलेन शिरसि पतन् प्रक्रमं समाप्नोति । तेन यत्र शिरस्येवास्य प्रथमप्रक्रमपूर्तिस्तत्र त्रीण्येव प्रक्रमपदान्युपपद्यन्ते—इत्यन्यत् । आस्याद् बाह्यानाममीषां प्रक्रमस्थानानां सवनत्वमाह नारदः—

उरः कण्ठः शिरश्चैव स्थानानि त्रीणि वाङ्मये ॥
सवनान्याहुरेतानि साम्नि चाप्यधरोत्तरे ॥१॥इति

एभिरेव त्रिभिः सवनैस्त्रैस्वर्यमुपपद्यते। तथाहि—नाभेरभ्युत्थितो वायुः करणभूतो यद्युरःस्थाने निपत्योत्पतितः क्रमेण मुखमागत्य वर्णभावे परिणमते तर्हि तस्यैष प्रक्रमः प्रातः सवनम् । तत्रैष मन्द्रः स्वरः संपद्यते । स औरस्योऽनुदात्तः ॥१॥ यदि तु कण्ठे निपत्योत्पतितो मुखमागतः स्यात् तर्हि मध्यन्दिनसवनम् । स मध्यमः स्वरः । स कर्णमूलीयः स्वरितः ॥२॥ यदि वा शिरोऽन्त एवास्य प्रथमः प्रक्रमः स्यात्

तर्हि तृतीयसवनम् ॥३॥ स तारस्वरः । स शार्षण्युदात्त । प्रातर्मन्द्रया वाचा प्रक्रमेत, मन्ध्यन्दिने मध्यमया । तृतीयसवने तारयेत्याह भगवानैतरेयः ।

यदा वा एष प्रातरुदेति—अथ मन्द्रं तपति ।
तस्मान्मन्द्रया वाचा प्रातः सवने शंसेत् ॥१॥
अथ यदाऽभ्येति—अथ बलीयस्तपति ।
तस्माद् बलीयस्या वाचा मध्यन्दिने शंसेत् ॥२॥
अथ यदाऽभितरामेति—अथ बलिष्ठतमं तपति ।
तस्माद् बलिष्ठतमया वाचा तृतीयसवने शंसेत् ॥३॥
यदि वाच ईशीत । वाग्घि शस्त्रम् । यया तु वाचोत्तरोत्तरिण्योत्सहेत—समापनाय, तया प्रपद्येत । एतत् सुशस्ततममिव भवति ॥ इति (ऐ.ब्रा. १४. प्र. ४४ कं.)

पाणिनिरप्याह—


प्रातः पठेन्नित्यमुरस्थितेन स्वरेण शार्दूलरुतोपमेन ॥
मध्यन्दिने कण्ठगतेन चैवं चक्राह्वसंकूजितसंनिभेन ॥१॥
तारं तु विद्यात् सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम् ॥
मयूरहंसान्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन ॥२॥(इति)

विरुद्धसवनेनोच्चारयितॄणामनुदात्तप्रायतायामुरःक्षताच्छोणितोद्गारः स्वरितप्रायतायां स्वरभङ्गः, उदात्तप्रायतायां तु मूर्च्छापत्तिः ।

अथ यथासवनं यथापदं च सर्वस्वरोच्चावचभावक्रमेणोच्चारणप्रक्रमे तदुच्चारणसौष्ठवं प्रतिभाति । प्रक्रमभेदात् त्रिस्वरभेदः । त्रिस्वरभेदाच्चायमकारोऽन्ये च स्वरास्त्रेधा भिद्यन्ते ।

उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः । इति ॥

परे तु प्रचयमप्यधिकमिच्छन्ति—



"अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः ॥
स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥१॥
उदात्तं प्रदेशिनीं विद्यात् प्रचयं मध्यतोऽङ्गुलिम् ॥
कनिष्ठां निहतं विद्यात् स्वरितं चाप्यनामिकाम् ॥२॥
(इति पाणिन्युक्तेः)

उदात्तमाख्याति वृषोऽङ्गुलीनां प्रदेशिनीमूलनिविष्टमूर्धा ॥
उपान्त्यमध्ये स्वरितं धृतं च कनिष्ठिकायामनुदात्तमेव ॥१॥

इत्यत्र प्रचयानुल्लेखे ऽपि वाक्यान्तरतो मध्यमायां तन्निर्देशलाभात् ॥

(२) उच्चैस्तरां वा वषट्कार इत्यादिषूपदिष्टोऽयमुदात्ततरोप्यन्यः स्वरः । एवं (३) सन्नतरोऽप्यन्यः स्वरः । उदात्ततरवदनुदात्ततरस्यापीष्टत्वात् ॥

अत एवाह भगवान्नारदः—

उदात्तश्चानुदात्तश्च स्वरितप्रचिते तथा ॥
निघातश्चेति विज्ञेयः स्वरभेदस्तु पञ्चधा ॥१॥इति

एकश्रुतिश्चान्यः स्वरः ।

"एकश्रुति दूरात् संबुद्धौ" "यज्ञकर्मण्यजपं न्यूंङ्खसामसु"

इत्यादिषु त्रैस्वर्य्यापवादेनैकश्रुतेर्विधानात् । वस्तुतस्तु नैते स्वरास्त्रैस्वर्याद्भिद्यन्ते । तथाहि—उदात्तस्यैव तारतम्येनोच्चारणात् त्रैविध्यमुपपद्यते । उदात्ततरमुदात्तं प्रचितं चेति । तेन स्वरसूक्ष्मत्वप्रदर्शनानुरोधात् त्रैविध्योपपत्तावपि—उदात्ततरप्रचितयोरुदात्तत्वं नोपहन्यते । तथा चाह भगवान्नारदः—

य एवोदात्त इत्युक्तः स एव स्वरितात् परः ॥
प्रचयः प्रोच्यते तज्ज्ञैर्नचात्रान्यत् स्वरान्तरम् ॥१॥

उदात्तस्वरितयोर्मध्यवर्तितया प्रचितस्य यथोदात्तत्वं केचिदिच्छन्ति। तथैवान्ये प्रचितस्य तस्य स्वरितेऽन्तर्भावं मन्यन्ते।

यथोक्तं याज्ञवल्क्येन—

उच्चानुदात्तयोर्योगे स्वरितः स्वर उच्यते।
ऐक्यं तत्प्रचयः प्रोक्तः सन्धिरेषां मिथोऽद्भुतः १॥ ॥इति।

एकश्रुतिस्तु त्रैस्वर्य्यव्यवस्थापवादो न त्रैस्वर्य्यापवादः। त्रैस्वर्य्यापवादे नैकस्याप्यक्षरस्योच्चारयितुमशक्यत्वात्। तस्मात् त्रय एव स्वराः प्रतिपत्तव्याः॥ ये तु साममन्त्रे सप्तस्वरा आख्यायन्ते—षड्जः ऋषभः गान्धारः मध्यमः पञ्चमः धैवतः निषादः इति। तेऽपि न त्रैस्वर्य्यादतिरिच्यन्ते।

उदात्ते निषादगान्धारावनुदात्त ऋषभधैवतौ।
स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥१॥

इति पाणिन्यादिभिस्त्रैस्वर्य्ये तदन्तर्भावोक्तेः।

गान्धर्ववेदे ये प्रोक्ताः सप्त षड्जादयः स्वराः।
त एव वेदे विज्ञेयास्त्रय उच्चादयः स्वराः ॥१॥
उच्चौ निषादगान्धारौ नीचावृषभधैवतौ।
शेषास्तु स्वरिता ज्ञेयाः षड्जमध्यमपञ्चमाः ॥२॥

इति याज्ञवल्क्यादिभिरभेदाभ्युपगमाच्च। वस्तुतस्तूदात्तादयः प्रक्रमोच्चत्वनीचत्वादिनिबन्धना भेदा इष्यन्ते। षड्जादयस्तु स्वरा ध्वनिरागभेदनिबन्धना इति भेदः। तथा चाह नारदः—

षड्जं वदति मयूरो गावो रम्भन्ति चर्षभम्।
अजाविके तु गान्धारं क्रौञ्चो वदति मध्यमम् ॥१॥

पुष्पसाधारणे काले कोकिला वक्ति पञ्चमम् ।
अश्वस्तु धैवतं वक्ति निषादं वक्ति कुञ्जरः ॥२॥

एषामुच्चारणोपयुक्तस्थानानि नारदशिक्षायां विशिष्य द्रष्टव्यानि । एषां च सप्तस्वरभेदानां गानोपयोगित्वात् साधारणोच्चारणे विशेषतोऽनुपयोगादिह परित्यागः । सर्वसाधारण्येन तु त्रय एव स्वराः सिद्धास्तेषां त्रयाणां लिपिभेदाभावेऽपि अनुदात्तस्याधस्तात्तिरश्चीनरेखया (अ॒) स्वरितस्योपरिष्टात्तिरश्चीनरेखया (अ॑) उदात्तस्योपरिष्टाद्दण्डरेखया (अ꣡) प्रचयस्य तु स्वरितोदात्तयोगरेखया (अ꣡॑) लिप्यनुगमः क्रियते, तदित्थं स्वराणां त्रैविध्यमनुभवगम्यं वायुप्रक्रमभेदादुन्नेयम् ॥२॥


अ.	स्व.	उ.	प्र.
अ॒	अ॑	अ꣡	अ꣡॑

इति द्वितीयः खण्डः ॥२॥


मुख्यस्थानतो वर्णभेदः ॥२॥

"**संयोगविभागशब्देभ्यः शब्दः**"—इति भगवान् कणादः प्राह । तत्र संयोगे यः स्थायीभावः स प्रतियोगी तत्स्थानम् । यः संचारीभावः सोऽनुयोगी तत्करणम् । ते च स्थानकरणे द्विविधे बाह्ये आभ्यन्तरे च । वायोः प्रक्रमे मुखागमनात् प्राग्भाविनी बाह्ये । मुखप्रदेशान्तर्गते त्वाभ्यन्तरे । तत्र बाह्यं स्थानमुरः कण्ठः शिर इति त्रिविधं व्याख्यातम् ।

अथ मुखे कण्ठतालुमूर्द्धदन्तोष्ठभेदात्पञ्च स्थानानि । कण्ठो जिह्वामूलम् । मुखे दन्तोलूखलस्थानादभ्यन्तरतो दिशि योऽवनतो भागस्तस्य पूर्वपार्श्वं तालुमूलस्थानम् । तस्यैव पश्चिमपार्श्वं तालुन एव मूर्द्धस्थानम् । ततोऽत्यासन्नः पश्चिमो भागो दन्तमूलस्थानम् । उत्तरोष्ठमोष्ठस्थानम् । एष्वेव पञ्चसु स्थानेषु क्रमेण जिह्वासम्बन्धिनां मूलमध्योपाग्राग्रभागानामधरोष्ठसहितानां करणाख्यानां संयोगतारतम्यात् सर्वे वर्णा उत्पद्यन्ते ।



वायुर्यया मात्रया येन प्रक्रमेण प्रक्रान्तः कण्ठस्थाने वर्णो भवन्नकारतामापद्यते, तयैव मात्रया तेनैव प्रक्रमेण प्रक्रान्तस्तालुस्थाने उपनमितः स इकारतामापदयते। मूर्द्धनि ऋकारतां, दन्तमूले लृकारतामोष्ठे तूकारतामिति विद्यात्। समानस्यैव प्राणद्रव्यस्य स्थानभेदनिबन्धनाः-अ.इ.ऋ.लृ.उ. इति स्वरूपभेदाः सम्भवन्ति। तथा चैकस्याकारस्य स्थानभेदात् पाश्चविध्यमिदमुन्नेयम्। तत्र च प्रक्रमभेदभिन्नानामुदात्तस्वरितानुदात्तानामविशेषेण कण्ठादिस्थानसंबन्धो दृश्यते। तेनैतेषां पञ्चैव स्थानानि सिध्यन्ति।



केचित्तु—कृकाटिका, जिह्वामूलम्, कर्णमूलमिति मुखादौ कण्ठे त्रयोभागास्त्रीणि स्थानानि। मुखमध्ये—तालु मूर्द्धा दन्तमूलमिति त्रीणि स्थानानि। मुखान्ते पुनः—सृक्का उपध्मा श्रोष्ठं चेति त्रीणि स्थानानि।

सर्वमुखानुगता नासानाडी तु नासिका स्थानमिति । एवं दशस्थानानि वर्णानामाभ्यन्तराणि मन्यन्ते ॥

	१	२	३		
३	मुखस्याद्ये भागे-उरोमूलम्	जिह्वामूलम्	कर्णमूलम्	स्थानानि	१ कण्ठः
३	मुखस्य मध्ये भागे-तालुमूलम्	मूर्द्धा	दन्तमूलम्	,,	[२]तालु.[३]मू.[४]द.
३	मुखस्यान्त्येभागे-सृक्का	उपध्मा	ओष्ठम्	,,	[५]ओष्ठम्॥
१	मुखस्य सर्वेषु भागेषु-नासिका	नासिका	नासिका	,,	

एषु सृक्कोपध्मयोरोष्ठोपपदयोरोष्ठेनैवोपसंग्रहं पश्यन् भगवान् पाणिनिस्त्वाह—

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च ॥१॥ इति ।

तत्र निरुक्तेभ्यः कण्ठतालुशिरोदन्तोष्ठस्थानेभ्यस्त्रीण्यतिरिच्यन्ते, उरो जिह्वामूलं नासिका चेति । तत्र—

हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम् ।
औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम् ॥१॥

इत्युक्तरीत्या—ह्ण.ह्न.ह्म.ह्य.ह्र.ह्ल.ह्वेषु हकारस्योरस्थानम् । ᳵकᳵख इति ककारात् खकाराद्वा प्रागुच्चरितस्यार्द्धविसर्गसदृशस्य हकारस्य जिह्वामूलं स्थानम् । ते उभे अधरोत्तरे कण्ठस्योपपदे भवतः । तथा चैकस्यैव कण्ठस्यावान्तरप्रदेशभेदविवक्षया कृकाटिकामूल-जिह्वामूल-कर्णमूलभेदैस्त्रैविध्येनोपपत्तिरिति कण्ठेनैव तयोरप्युपसंग्रहणात् पञ्चैव स्थानानि निष्कृष्यन्ते । नासिकाया अपि कण्ठेन तालुमूर्द्धदन्तैरोष्ठेन च सहोपेतत्वात् पञ्चानामपि मुखस्थानानामुपपदतया पञ्चस्वेव तेषु स्थानेष्वन्तर्भावोपगमात् । तथाचेत्थं पृथक्त्वेनोपगमे दश स्थानानि,

संक्षेपतस्तु पञ्चस्थानानीत्येवं विवक्षानुरोधान्न्यूनाधिकोपदेशानामविरोधो द्रष्टव्यः। नासिकायाश्चेतरैः पञ्चभिः स्थानैरविरोधान्मुखनासिकाभ्यामुच्चरिताः पञ्चान्ये स्वरा उपपद्यन्ते अँ.इँ.ऋँ.ऌँ.उँ इति। त इमेऽनुनासिकाः पञ्च स्वराः। ऋकारे ऌकारे च स्वरभक्तेर्नासिक्यतयाऽनुनासिकत्वम् ॥*॥

॥ इति तृतीयः खण्डः ॥

कालतो वर्णभेदः ॥३॥

अकारोच्चारणकालो मात्रा। **"निमेषकालो मात्रा स्याद्"** इत्यौदव्रजिः।

"निमेषकालो मात्रा स्याद् विद्युत्कालेति चापरे"।

इति नारदः। तस्यास्तारतम्यादितरेषां वर्णानां मात्रा नियम्यन्ते। अकारोऽयमकारेण सन्धीयमानः परतो योगाद् द्विमात्रो दीर्घो भवति। अकारोऽयमाकारेण सन्धीयमानः स्वभावादभिनिहितो भवति। अन्तर्विलीयमानमभिनिधानं नाभिद्वयैकत्वम्।

अधिकबले स्वल्पबलस्य विलयनं निसर्गः। तेनैतस्मिन्नाकारे द्विमात्रेऽकारस्य प्रत्यस्तमितत्वाद् द्विमात्रमेवावतिष्ठते न त्रिमात्रत्वम्।

आकारो यद्यकारेण सन्धीयते आकारेण वा तत्रापि नाभिद्वययोगादभिनिहितत्वमिति द्विमात्रत्वमेव, न त्रिमात्रत्वं चतुर्मात्रत्वं वा। परतो योगमन्तरेण चतुर्मात्रत्वासम्भवात्। प्रयत्नविशेषेण परतो योगापेक्षायां तु त्रिमात्रत्वं चतुर्मात्रत्वं वा सम्भाव्यते तस्य प्लुतसंज्ञा। तथा च मात्रातारतम्यादकारस्य त्रैभाव्यमुपपद्यते। अकारः **स्वमात्रयो**च्चारितो ह्रस्वः। द्विगुणमात्रया दीर्घः। त्रिगुणमात्रया **तदधिकमात्रया** वा वितानितः स प्लुतः—इति मात्रात्रैविध्यम्।

एवमिकारादीनामपि स्वराणां मात्राभेदात् त्रैविध्यमुन्नेयम्। लृकारस्य तु दीर्घभावो नास्तीति तस्य दीर्घा उदात्तस्वरितानुदात्ता हीयन्ते। तदित्थं प्रक्रमभेदात् स्थानभेदान्मात्राभेदाच्चायमकारो द्वाचत्वारिंशद्विधो विशुद्धः सम्पद्यते। तावानेव (४२) चानुनासिक इति चतुरशीतिभेदाः स्युः। ६४॥

॥ इति चतुर्थः खण्डः ॥४

आभ्यन्तरप्रयत्नतो वर्णभेदः ॥४॥

मुखाभ्यन्तरतः पञ्चसु कण्ठतालुमूर्द्धदन्तोष्ठस्थानेषु संयोगाय करणानां यः प्रयत्नः स आभ्यन्तरप्रयत्नः। स द्विविधः स्पृष्टो विवृतश्च।

येन स्थानेषु करणानां स्पर्शतारतम्यं घटते स स्पृष्टः।

(१) अ. इ. ऋ. लृ. उ.—इत्यस्पृष्टाः स्वराः।
(२) ऽ. य. र. ल. व.—इतीषत्स्पृष्टा अन्तःस्थाः।
(३) अ़. य़ ड़ ळ व़—इति दुःस्पृष्टा अन्तस्थाः।
(४) ग. ज. ड. द. ब.—इति मृदुस्पृष्टाः स्पर्शाः।

अथ विवरणं संप्रसारणम्। येन स्थानेषु संयोगकाले करणानि तारतम्याद्विव्रियन्ते स विवृतः स्पर्शप्रतिद्वन्द्वी धर्म्मः।

तेन विवृतप्रयत्ने स्पर्शाभावः। अतएव—अ, इ, ऋ, लृ, उ—इति पूर्णविवृताः स्वराः। अथ यावदेव स्पर्शाय प्रयत्नः क्रियते तावदेवायं विवृतः प्रयत्नोऽपचीयते। स्पर्शतारतम्याद्विवृततारतम्यं घटते इति बोध्यम्।

अथ सम्प्रसारितस्थानकरणानामेषामेकैकस्य यावती मात्रा भवति सा तत्रार्धेनापचीयते। यत्र विवृतार्द्धप्रयत्नेनैषामाकुञ्चनं क्रियते तेनार्द्ध-मात्रिकाणि व्यञ्जनानि जायन्ते।

यथा—।ऽ य. र. ल. व. इत्यर्द्धविवृता अन्तस्थाः । तत्राऽयं प्रथमो वर्णो विवृतिः । सोऽर्द्ध मात्रो वर्णः । अभिनिधान सन्ध्यक्षराण्यु-ष्मान्तस्थगतिश्च तस्य स्थानम् । हरेऽव, विष्णोऽवेत्यभिनिधानस्थानम् । ए. ओ इति सन्ध्यक्षरस्थानम् । इकाराकारयोः सन्धौ यथाऽयमिकारः परयाऽर्द्धमात्रया विहीयते । तेनार्द्धमात्राऽवशेषाद् यकारो व्यञ्जनं भवति तथैवाकारेकारयोः सन्धौ पूर्वोऽयमकारः परयार्द्धमात्रया विहीयते । तेनार्द्धमात्रोऽकारोऽवशिष्यते ॥ उक्तञ्च पाणिनिना—

"अर्द्धमात्रा तु कण्ठ्यस्य एकारौकारयोर्भवेद्"।

इति तस्यार्द्धमात्रत्वाद् व्यञ्जनत्वम् । पूर्णस्पृष्टत्वाभावात् स्वरत्वम् । तथा चोभयधर्म्मयोगादन्तःस्थत्वमुपपद्यते ॥२॥

अथ तृतीयं स्थानमुष्मान्तःस्थगतिः । तद्यथा—सद्य इह, हर इह, विष्ण इहेति । सद्य इहेत्यत्रोष्मा हकारो विसर्गो वा विवृत्यकारोऽर्द्धमात्रो जायते ।

ओभावश्च विवृतिश्च शषसा रेफ एव च ॥
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥१॥

इति पाणिनिस्मरणात् । तस्य व्यञ्जनत्वात् तेन विच्छेदात् स्वरसन्धिर्नास्ति । एवं हर इहेत्यादावन्तस्थो विवृतिमापद्यते । तस्य स्वरद्वयमध्यस्थो विच्छेद एव रूपम् । शाकल्यस्तु यवयोस्तत्र लोपं मन्यते, तदसत् । वर्णलोपे स्वरसन्धेरनिवार्यत्वापत्तेः । वैयाकरणोपकल्पितं पूर्वत्रासिद्धेः सन्ध्यभाववचनन्तु बालशिक्षौपयिकं कल्पना-मात्रम् । शास्त्रीयप्रक्रियाविशेषस्य शब्दोच्चारणविशेषाधाने सामर्थ्या-लाभात् । शास्त्रस्य शब्दस्थितिज्ञापकत्वमुपपदचते न तु तज्जनकत्वम् । अत एव लोपप्रक्रियायामसन्तुष्यन् पाणिनिः लोपः शाकल्यस्येत्याह । तथा च पाणिनिमते विवृतिवर्णादेशो यवयोः स्थाने भवतीति तद्विच्छेदात् सन्ध्यभावः स्वरसतोऽवकल्प्यते इति बोध्यम् ।

एषामन्तःस्थानां मुखनासिकाभ्यामुच्चारणे यँ वँ लाँ अनुनासिकाः स्युः । रेफस्तु नासिक्यो नास्ति । विवृतिश्च नासिक्या न दृश्यते । अ. य. ड़. ळ. व.—इतीषद्विवृता अन्तस्थाः । एषु प्रथमो वर्णः संवृतोऽकारः । ऐ औ इत्यनयोर्योऽयमकारोच्चारणाभासः सोऽयं संवृतोऽकारः ।

"अर्द्धमात्रा तु कण्ठ्यस्य एकारौकारयोर्भवेत् ।
ऐकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥१॥
संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम्" ।

इति पाणिनिस्मरणात् । यत्तु

स्वराणामूष्मणां चैव विवृतं करणं स्मृतम् ।
तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥१॥

इत्येवमेकारौकारयोर्विवृततरत्वम् । ऐकारौकारयोस्तु विवृततमत्वमुपदिश्यते तत् सन्ध्यक्षरापेक्षम् । संवृतत्वाख्यानं तु तत्प्रदेशापेक्षमित्यविरोधः ।

संवृतान्तःस्थाकारगर्भिणां सन्ध्यक्षराणां स्वरत्वं व्याहन्यते इति तु न भ्रमितव्यम् । विवृततरत्वविवृततमत्वाभ्यां स्वरत्वोपगमस्यावक्लृप्तत्वात् । म्लेच्छभाषालिपिविशेषेऽपीदमकारद्वैविध्यं दृश्यते । यथा-पारस्यलिपौ विवृताकारमलिपि (ا) शब्देन, संवृताकारन्तु "अयन्" (ع) शब्देनोल्लिखन्ति । "अ अ"—इति सूत्रयन् भगवान् पाणिनिश्चेदं द्वैविध्यमुपदिशति । तत्र संवृताकारस्यान्तःस्थत्वं प्रतिपत्तव्यम् ।

स्वराणामूष्मणां चैव विवृतं करणं स्मृतम् ॥

इत्येवं स्वराणां विवृतत्वेनोपदिष्टत्वात् । ऐ. औ इत्यादौ पृथगिवाकारोच्चारणप्रतिबन्धार्थं तदुच्चारणे प्रयत्नविशेषस्यापेक्षणाच्चैतस्य दुःस्पृष्टत्वं विद्यात् । ईषत्स्पृष्टपूर्णस्पृष्टयोरन्तरतो मध्यमवृत्त्या स्पर्शसिद्ध्यर्थं प्रयत्नविशेषस्य तत्रापेक्षितत्वादिति बोध्यम् ।

ग. ज. ड. द. ब—इत्यविवृताः स्पर्शाः। यदि त्वेते पञ्चस्पर्शा मुखनासिकाभ्यामुच्यन्ते तर्हि स्थानद्वययोगिनस्ते ङ ञ. ण. न. म. इत्येवं रूपाणि लभन्ते। शुद्धवन्नासिक्या अप्येते पूर्णस्पृष्टा अविवृता एव स्युः ॥*॥

इति पञ्चमः खण्डः ॥५॥

—

॥ बाह्यप्रयत्नतो वर्णभेदः ॥

वर्णोपादानभूतो वायुर्वर्णभावात् प्रागवस्थोऽनुप्रदानं नाम। मुखायतनाद् बहिर्भूतेषु उरःकण्ठशिरःस्थानेषु संयोगायानुप्रदानानां यः प्रयत्नः सोऽनुप्रदानप्रयत्नो बाह्यप्रयत्नः। स द्विविधः संवारो नादो घोष इत्येवं त्रिधाकृतः प्रथमः। विवारः श्वासोऽघोष इत्येवं त्रिधाकृतो द्वितीयः। यत्रोच्चारणेऽनुप्रदानं मृदुविग्रहत्वात् कण्ठनलीं न विवृणुते स संवारः। खरविग्रहत्वात् तां विवृणुते चेत् स विवारः ॥

अथ यत्र वर्णस्वरूपारम्भायानुप्रदाने वायोर्भूयसी मात्रा संनिधत्ते कनीयसी तु प्राणस्य तेजसः स श्वासः। प्राणस्यैव तेजसो भूयसी मात्रा कनीयसो चेद् वायोः स नादः।

यस्मिन् प्रयत्ने दृढाङ्गबन्धादुच्चरितस्य वर्णस्य प्रतिध्वनियोग्यता कनीयसी संपद्यते सोऽघोषः। श्लथाङ्गबन्धात् तद्योग्यताभूयस्त्वे तु घोषः। यथा संवारनादघोषाणामन्योन्यानुग्राहित्वादविनाभूतत्वं तथा विवारश्वासाघोषाणां चेति सत्यपि षट्त्वेऽनुप्रदानप्रयत्नद्वैविध्यमिष्यते। तथा च संवारनादघोषाऽनुप्रदानतया ये पूर्वे अ य र ल वाः अ़ य़ ड़ ळ वाः ग ज ड द बाः ङ य ण न माश्च क्रमेण संसिद्धाः। त एव च विवारश्वासाघोषानुप्रदानतायां क च ट त पा इति जायन्ते। विवारश्वासाघोषाणां नासानाडीप्रतिपन्थितया कचादीनां नासिक्यत्वं नास्ति। तेनैतेषां ङ ञ ण न मानामपि श्वासानुप्रदानत्वेनोच्चारणे विशुद्धा एव क च ट त पा उच्चार्यन्ते नानुनासिकाः।

ईषन्नादा यण् जशो नादिनो हझषः स्मृताः ॥
ईषच्छ्वासांश्चरो विद्याच्छ्वासिनस्तु खफादयः ॥१॥

इत्येवं ब्रुवन् पाणिनिरन्तःस्थानां गजडदबानां चेषन्नादत्वं क च ट त पा नां त्वीषच्छ्वासत्वमाचष्टे तत्तु सोष्मवर्णापेक्षया न्यूनत्वाभिप्रायं द्रष्टव्यम् । ग ज ड द बापेक्षया घ झ ढ ध भ हेष्वधिकनादस्य तथा क च ट त पापेक्षया ख छ ठ थ फ श ष सेष्वधिकश्वासस्यानुभवसिद्धत्वात् ॥

अथैते पूर्णस्पृष्टाः क च ट त पा यद्याभ्यन्तरप्रयत्नभेदान्नेमस्पृष्टाः कृत्वोच्चार्य्यन्ते तर्हि श ष स हा इति ऊष्माणो जायन्ते ।

क पयोर्नेमस्पृष्टतयोच्चारणे निर्विशेषं हकारोदयाच्चत्वार एवोष्माणो निष्पद्यन्ते । शषसहा नासिक्या न सन्ति । विवारश्वासाघोषाणां नासानाडीप्रतिपन्थित्वात् । "अमोऽनुनासिका न ह्रौ"—इति पाणिन्युक्त्या नादिनो रेफहकारयोः श्वासिनां च सर्वेषामनुनासिकत्वप्रत्याख्यानाच्च । तदित्थं प्रयत्नद्वयभेदाच्चतुस्त्रिंशद्वर्णा निष्पद्यन्ते । तत्रादितः पञ्च स्वराः एकोनत्रिंशद् व्यञ्जनानि ॥*॥

इति षष्ठः खण्डः ॥६॥

॥ अथ सन्ध्यक्षराणां स्थानप्रयत्नाः ॥

यौगिकेषु तु वर्णेषु सवर्णद्वययोगे स्थानभेदो नास्ति । तेन ह्रस्वदीर्घप्लुतानामविशेषात् सस्थानत्वम् ॥ अ आ अ ३ कण्ठ्याः । इ ई इ ३ तालव्या इत्यदि ॥ विभिन्नस्थानिनोस्तु संहितायां सन्ध्यक्षरस्य द्विस्थानत्वमनुभूयते ॥ आह च तथा—

"ए ऐ तु कण्ठतालव्यावो औ कण्ठोष्ठजौ स्मृतौ" ॥इति

हकारस्तूष्मा द्वेधा संयुज्यते—पुरस्ताच्चोपरिष्टाच्च । तत्र-पञ्चमान्तःस्थानां प्रत्ययत्वे पुरस्तात् संयुक्तो हकारो निगीर्णो भवतीत्युरः

स्थानं भजते । ह्ङ· ह्त· ह्म· ह्य ह्र ह्ल ह्व । इति ॥ कखयोः प्रत्ययत्वे हकारस्य जिह्वामूलं स्थानम् । पफयोः प्रत्ययत्वे हकारस्योपध्मानं स्थानम्, इति शाकटायनो मन्यते । अथ क च ट त पेभ्यो ग ज ड द बेभ्यो ङ ञ ण न मेभ्यो र ल ड़ ळे भ्यश्चोपरिष्टात् प्रयुक्तस्य हकारस्याश्रयस्थान-भाक्त्वं निष्पद्यते । तेन ख छ ठ थ फाः क च ट त पै घ झ ढ ध भा ग ज ड द बै सस्थानाः सिध्यन्ति । तथोक्तम्—

"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ॥
स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः ॥१॥
जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः" ॥इति॥

ढस्य मूर्द्धा । ळ्हस्य दन्तः । ङ ण न मानां रलयोश्च सोष्मत्वं लोकभाषायां दृश्यते - साङ्हा, कान्हा, साह्मर, गेल्हा-इत्यादि । छन्दोभाषायां चैते प्रयुक्ता न दृश्यन्ते -इत्यतस्तानुपेक्ष्य कात्यायनः सोष्म-त्वेन दशवर्णानिवोपक्षिपति । **" द्वितीयचतुर्थाःसोष्माण "** इति । हकारस्यार्द्धस्पृष्टत्वेऽपि आश्रयाणां कगादीनां पूर्णस्पृष्टत्वात् सोष्मणा-मपि पूर्णस्पृष्टत्वमुन्नीयते ॥

अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः ॥
शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥"॥इति

अनुप्रदाने त्वस्ति विशेषः । प्रथमास्तृतीयाश्चाल्पप्राणाः—क च ट त पा, ग ज ड द बाश्चेति । द्वितीयचतुर्थास्तु महाप्राणाः ।

ईषन्नादा यण् जशो नादिनो हझषः स्मृताः ॥
ईषच्छ्वासांश्चरो विद्याच्छ्वासिनस्तु खफादयः ॥१॥इत्युक्तेः॥

अस्य प्रकरणस्य लेखाचित्रद्वारा स्पष्टीकरणम्—

परात्परः

असङ्गः १ अव्ययः = आनन्दः		२ अक्षरः = ब्रह्मा
	विज्ञानम्	विष्णुः
	मनः	इन्द्रः
	प्राणः	अग्निः
	वाक्	सोमः

ससङ्गः ३ क्षरः =	प्राणः =	आपः	वाक्	अन्नादः	अन्नम्
	आपः =	वाक्	अन्नादः	अन्नम्	प्राणः
	वाक् =	अन्नादः	अन्नम्	प्राणः	आपः
	अन्नादः =	अन्नम्	प्राणः	आपः	वाक्
	अन्नम् =	प्राणः	आपः	वाक्	अन्नादः

१ स्फोटः = महावाक्यम्	२ अक्षरम् = अ
वाक्यम्	इ
अक्षरम्	ऋ
पदम्	ऌ
वर्णाः	उ

३ वर्णाः =			
अ	ह	ग	क
य	य	ज	च
र	ड़	ड	ट
ल	ळ	द	त
व	व़	ब	प
ईषत्स्पृष्ट	दुःस्पृष्ट	मृदुस्पृष्ट	खरस्पृष्ट
घ	ख	ङ	ह
झ	छ	ञ	श
ढ	ठ	ण	ष
ध	थ	न	स
भ	फ	म	ह
सोष्ममृदुस्पृष्ट	सोष्मखरस्पृष्ट	नासिक्यस्पृष्ट	अर्द्धस्पृष्ट

इति सप्तमः खण्डः ।

इतिमधुसूदनविद्यावाचस्पतिप्रणीते पथ्यास्वस्तिग्रन्थे गुणपरिष्कार-स्तृतीयः प्रपाठः समाप्तः ॥३॥

——

॥ अथाक्षरनिर्देशश्चतुर्थः प्रपाठः प्रारभ्यते ॥

स्वरो वर्णोऽक्षरं मात्रा तत्प्रयोगोऽर्थ एव च ॥
मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे ॥१॥
वेदस्याऽध्ययनाद्धर्मः संप्रदानात् तथा श्रुतेः ॥
वर्णशोऽक्षरशो ज्ञानाद् विभक्तिपदशोऽपि च ॥२॥

इति कात्यायनस्मरणाद् वर्णाक्षरज्ञानपूर्वकं वेदार्थज्ञानं ब्राह्मणानामकारणं धर्म्मः । तत्र वर्णज्ञानं साधितम् । अक्षरज्ञानं साधयितव्यमितीदं प्रकरणमारभ्यते ॥

ब्रह्म जानानो ब्राह्मणो भवति । ब्रह्म च त्रेधा विवर्त्तमानमिदं विश्वं निष्पद्यते । परमक्षरं क्षरं चेति । दिग्देशकालानवच्छिन्नमपि यत्-क्षराऽक्षरयोरालम्बनतया मनोवत् परिच्छिद्यमानं भवति तन्मनोमय-मव्ययं नाम रूपं परम् । तत्क्षीयमाने सन्मनश्च भवति प्राणश्च वाक् च । तत्रास्मिन् मनोमयेऽव्ययेऽवलम्बितं प्राणमयं क्षरसञ्चालकं कूटस्थमक्षरम्। तदवलम्बितं वाङ्मयमशेषमिदं भूतजातं क्षरम् । नैतेभ्योऽतिरिच्यते किञ्चित् । त्रयोऽप्येते पुरुषा एकः पुरुषः । स विशुद्ध आत्मा वा विग्रहवानात्मा वा, अनेकैर्विग्रहवद्भिः कृत स्कन्धो वा. स पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् । स एकैकः पुरुषो मनोमयः प्राणमयो वाङ्मयः प्रतिपद्यते ।

"अथो वागेवेदं सर्व" मित्याह वेदपुरुषः । वागाकाशः । स वायुः। तत्तेजः । ता आपः । सा पृथिवी । सेयं पृथिव्यप्सु । आपस्तेजसि । तेजो वायौ । वायुराकाशे वाचि प्रतितिष्ठतीत्येवं वाच एवैते विकारा वाचो न व्यतिरिच्यन्ते । तस्माद् वागेवेदं सर्वं यदेतत् किञ्चित् क्वचिद् भूतजातमाकलयामः । अत एव च **"वाचीमा विश्वा भुवनान्यर्पिता"**—इति च भगवान् वेदमहर्षिः प्राह । तानि

चैतानि सर्वाणि क्षराणि परतन्त्रत्वात् स्वतः स्थातुं न शक्नुवन्तीत्येतेषां सत्ताधायकमस्ति किञ्चिदन्तरतः स्वतन्त्रं तत्त्वमक्षरं नाम । स प्राणः । तत्रानन्तगुणा उपपद्यन्त इति गुणभेदादनन्तविधानपि तान् प्राणान् स्थानपाञ्चविध्यात् पञ्चविधानाहुः । त इमे पञ्चाक्षरा. श्रूयन्ते ब्रह्मेन्द्रविष्णवोऽग्निसोमौ चेति । एभ्य एव तु पञ्चभ्योऽक्षरेभ्यः सर्वाणि वाङ्मयान्येतानि क्षराणि भूतजातानि जायन्ते तदाधारेण प्रतितिष्ठन्ति तत्रैव चान्ते विलीयन्ते । इति परब्रह्मविद्या भवति ॥१॥

तत्रेयं वाक् त्रेधा विनियुज्यते-भूतभावेन,शब्दभावेनार्थभावेन चेति । वाच आकाशाद् वाय्वादिक्रमेणोत्पन्नानि भूतजातानि भूतमयः प्रपञ्चः । स एको विनियोगः ।१। अथ "तत् सृष्ट्वा तदेवानुप्राविशदि"ति नियमाद् वाय्वादिभूतेष्वनुप्रविष्टो वागाकाश एवाघातेन कम्पितः पृथग् भूत्वा वाय्वाधारेण वर्तुलवृत्तं चतुर्दिक्षु वीचीतरङ्गं जनयति । स नादात्मना कम्पमानो धावन् श्रोत्रमागतः श्रोत्रेन्द्रियप्रज्ञया समन्वयाच्छब्द-इत्युच्यते । स च शब्दमयप्रपञ्चार्थमयप्रपञ्चाभ्यां द्वेधा विनियुज्यते । तदुक्तं हरिणा—

"अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥इति॥

उभयविधोऽयं वाङ्मयप्रपञ्चः । स वाचोऽन्यो द्विविधो विनियोगः । तत्रापि त एव प्रकारा अनुवर्तन्ते ये भूतमयप्रपञ्चे व्याख्याताः । कनीयांश्चायं वाङ्मयप्रपञ्चो भूतमयप्रपञ्चात् । तस्य तदेकदेशत्वात् । तेन परब्रह्मविद्यामधिजिगासुरादौ शब्दब्रह्मविद्यां परिशीलयेत् । अल्पायासेनाधिगता हि सा शब्दविद्या महायाससाध्यायाः परविद्याया अधिगमायोपयुज्यते । तथा चाह भगवान् वेदपुरुषः ।

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।
शाब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥१॥इति॥

तत्र ब्रह्मेति विज्ञानमाहुः । तद् द्विविधं शाब्दं परं चेति । विज्ञानाभिनिवेशाभ्यां ज्ञानसिद्धिं भगवान् गौतमो मन्यते । शब्द-

श्रवणाधीनाऽर्थप्रतिपत्तिर्विज्ञानं तच्छाब्दं ब्रह्म। अथ परीक्षाद्वारा साक्षाद्दर्शनाधीनाऽर्थप्रतिपत्तिः परं ब्रह्म। तत्र पूर्वेषां परीक्षकाणां द्रष्टृणामाप्तार्थविषयकोपदेशवाक्यार्थश्रवणे निष्णाता यदि परीक्षार्थं प्रवर्त्तेरन् तर्हि तेषामभिनिवेशज्ञानं साधीयः स्यादित्ययमर्थः प्रथमः।

अथवैतदन्यथा व्याख्यास्यामः। शब्दस्तावत् प्रकारद्वयेन ज्ञानं जनयति। अभिधानेन प्रतीकत्वेन चेति। ओंशब्दवाच्यं च ब्रह्म। ओमिति शब्दश्च ब्रह्म। तथा च श्रूयते—

"एतद्वै सत्यकामपरं चावरं च ब्रह्म यदोंकारः ॥इति॥

तत्रैतदभिधानपक्षेणायमर्थो व्याख्यातः। अथ खलु शब्दप्रतीकत्वपक्षेणाप्यस्यार्थो द्रष्टव्यः। द्वे विद्ये भवतः। परा चैवापरा च। परब्रह्मविद्या परा। शब्दब्रह्मविद्या त्वपरा, भूयसा साम्येनोभयोः प्रवृत्तिरिति शब्दसृष्टिज्ञानेन तत्साद्दश्यवशादर्थसृष्टिज्ञानमपि सिद्ध भवति इति पश्यन्ति। यथा च परविद्यायामव्ययमक्षरं क्षरमिति त्रिविधं प्राणब्रह्म। एवमिहापरविद्यायामपि स्फोटोऽक्षरं वर्ण इति त्रिविधं वाग्ब्रह्म। तत्र वर्णानामक्षराणां पदानां समस्तपदानां वाक्यानां चैकत्वबुद्धिप्रयोजकः स्फोटोऽव्ययमव्ययपुरुषवदमीषामक्षरादीनामालम्बनं भवति, इत्यन्यत्र व्याख्यातम्। तत्रैते नित्यमन्वाभक्ताः स्वरवर्णाः पञ्चाक्षरशब्देन व्यपदिश्यन्ते- अ. इ. उ. ऋ. लृ. इति। पञ्चभ्य एवैतेभ्योऽक्षरेभ्यः क्षराः सर्वे व्यञ्जनवर्णा उत्पद्यन्ते। अक्षरोपगृहीताः क्षरा अक्षरालम्बनेऽव्ययायतने प्रतितिष्ठन्ति। परतन्त्राणि क्षराणि व्यञ्जनान्यक्षरं स्वरमालम्बन्ते। अक्षरं तत् स्वरजातमव्यये स्फोटेऽन्वाभक्तं रूपं धत्ते। त्रितयमिदमेकीभूतमेका वाक्।

अथ वाक्यं पदैः पदमक्षरैरक्षरमपि क्षरैर्वर्णैः कृतरूपं भवतीत्यतइदमक्षरं वा पदं वा वाक्यं वा सर्वापीयं वाग्वर्णैरेवाद्धा कृतरूपाऽवधीयते। अक्षरं तु वर्णानामात्मा भवतीति वर्णेभ्यो भिद्यते।

अतएव—"स्वरो वर्णोऽक्षरं मात्रा विनियोगोऽर्थ एव च ।
मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे"
इत्यादिवाक्ये वर्णाक्षरयोर्भेदः स्मर्य्यते ॥

यत्तु वर्णसमाम्नायोऽक्षरसमाम्नाय इत्यादावभेदेन व्यवहार-दर्शनाद् वर्ण एवाक्षरमिति बालकाः पश्यन्ति तद् भ्रान्तम् । तयोरष्टधा प्रभेदोपलब्धेः । (१) वर्णाः क्षराः, अक्षराण्यक्षरा इति पुरुषतः ॥ (२) वर्णाश्चतुःषष्टिः । अक्षरं तु गुरुलघुभेदाद् द्विविधमेवेति संख्यातः । (३) एकबिन्दुर्वर्णः । नवबिन्दु त्वक्षरमिति योनितः ॥ (४) निर्व्यापारो वर्णः । पञ्चमबिन्दुस्थस्याक्षरस्य निर्व्यापरत्वे पृष्ठतो व्यापारत्वे वा लघुत्वम् । पुरतो व्यापारत्वे गुरुत्वमिति व्यापारतः ॥ (५) वर्णानामन्नत्वमक्षराणामन्नादत्वमिति वीर्य्यतः ॥ (६) अक्षरप्रतिष्ठया प्रतिष्ठिताः स्वतोऽप्रतिष्ठा एते वर्णाः स्वप्रतिष्ठानि त्वक्षराणि—इति प्रतिष्ठातः ॥ (७) वर्णा अक्षरस्याङ्गानि । अक्षरं पुनरेषां वर्णानामङ्गीत्यात्मतः ॥ (८) ओमिति त्रयो वर्णा एकमक्षर-मिति प्रतिपत्तिभेदतश्च ।

तदित्थमिदमर्थद्वयं सिद्धं भवति । वर्णेभ्योऽक्षरमन्योऽर्थ इत्येकम् ॥ अर्थानां च शब्दानां च त्रैधातव्यसाम्यात् परब्रह्मविद्या-शब्दब्रह्म-विद्ययोरन्योन्यं सौसादृश्यमस्तीति द्वितोयम् ॥

इति प्रथमः खण्डः ॥१॥

अक्षरस्य गुरुत्व-लघुत्वोपपत्यर्थं वर्णानामङ्गाङ्गिभावो व्याख्यायते । बृहत्या वाच पतिः बृहस्पतिरित्यादौ वाचो वृहतीत्वं ब्रुवते । बृहती चेयमैन्द्रं छन्दः । बृहतीसहस्रस्येन्द्रप्रियधामत्वेनैतरेयारण्यकश्रुतौ व्याख्यानात् । तस्मादियमैन्द्री वाग् बृहती । बृहतीति नवभक्तिच्छन्दसः संज्ञा । बृहतीत्वं चोपदिश द्भिराचार्य्यैरेतस्याः स्वरवर्णात्मिकाया ऐन्द्रचा वाचो नवभक्तिकत्वं विवक्ष्यते । तथा चैतस्या वाचोनव बिन्दवो व्याप्तिस्थान-मित्येनावानय मक्षरस्फोटो द्रष्टव्यः ।

एकैकं व्यञ्जनमुच्चार्यमाणं यावन्तं प्रदेशमवगाहते सोऽर्द्ध-मात्राकालः। तदुपलक्षणमयमेकैको विन्दुः। यद्यपि स्वर एवाक्षर-मुच्यते, स्वरश्च केवलं द्वौ विन्दू अवगाहते न तु नव विन्दून्। स्वरस्यैक-मात्रतया, द्वाभ्यामेव चार्धमात्रबिन्दुभ्यामेकमात्रत्वसम्पत्तेः। तथापि तस्य नवबिन्दुकमिदमायतनं क्रान्तिस्थानं भवति। एतावति प्रदेशेऽयं स्वरो व्यञ्जनान्यात्मसात्कर्तुं क्षमते। सव्यञ्जनोऽपि स्वरोऽक्षरं भवति। तथाचैवंविधस्य क्षरस्यायं नवविन्दुकः स्फोट आयतनं विज्ञायते। तदव्ययम्।

अयमत्राभिसन्धिः। परब्रह्मणीवास्मिन् शब्दब्रह्मण्यप्यक्षरमात्मा उक्थाऽर्काऽशितिभेदात् त्रिभक्तिर्भवति। तत्रायं विन्दुद्वयावगाही स्वर आत्मा उक्थम्। तस्यैते सप्तविन्दवोऽर्कस्थानम्। उक्थादुत्थिताः प्राणा अर्काः। ते क्रान्तिमण्डले स्वे महिम्नि अशितिमाधातुमाक्रम-माणाः क्षरं व्यञ्जनमात्मसात्कुर्वन्ति। ततोऽयमुक्थ आत्मा क्रान्तिमण्ड-लाख्ये स्वे महिम्नि स्वेनार्केणाभिनिगृहीतान् व्यञ्जनवर्णानात्मन्विनः करोति। तेनैतस्य स्वरमात्रस्याऽक्षरत्वेऽपि तावतां क्षराणां व्यञ्जना-नामक्षरसत्तयैव सत्तावत्वात् तावद् व्यञ्जनविशिष्टस्यास्य स्वरस्या-क्षरत्वमुपपद्यते। यथा अ इत्येकमक्षरम्। एवं य[१] र्य[२] त्र्य[३] स्त्र्य[४], इत्येता-न्यप्येकैकान्यक्षराणि भवन्ति। तानि उपसर्गव्यञ्जनतारतम्येऽपि छन्दसि समानं स्थानमवगाहन्ते। एवमुत्तरतोऽपि अ[१], अर्[२], अर्क्[३], अर्वट्, इत्येवं चत्वार्यप्यक्षराणि उपधानव्यञ्जनतारतम्येऽपि छन्दसि समानं स्थानं भजन्ते। तत्र व्यञ्जनाऽभावे शुद्धस्यैव स्वरस्याक्षरत्वम्। पृष्ठतः पुरतो वा व्यञ्जनसत्वे तु तद्विशिष्टस्यैवाक्षरत्वं न तु शुद्धस्येत्या-वेदयति भगवान् कात्यायनः– "**स्वरोऽक्षरं सहाद्यैर्व्यञ्जनैरुत्तरैश्चाव-सितैः**"–इति। स्वरो द्वेधोपपद्यते अपृक्तो व्यञ्जनसंपृक्तश्च। "**अहम्**"। इत्यत्र प्रथमोऽकारोऽपृक्तः। तस्य द्वेधा प्रतिपत्तिः शक्या कर्तुम्। वर्णत्वेनाक्षरत्वेन चेत्याह—"**स्वरोऽक्षर**" मिति। हकारा-दुत्तरस्त्वकारो हमाभ्यां संपृक्तः। तत्र व्यञ्जनविशिष्टस्य स्वरस्य

व्यञ्जनोपहितत्वेन दृष्टौ वर्णत्वमेव नाक्षरत्वमित्याह– "सहाद्यै" रित्यादि । तेन हम्,, इत्येतावतो व्यञ्जनविशिष्टस्वरस्याक्षरत्वं विधीयते । "वागित्येकमक्षरम्-अक्षरमिति त्र्यक्षरम्" (ऐ.ब्रा. २१ अ. इत्यैतरेयश्रुत्या तथैव प्रतिपत्तेः । कतिभिर्व्यञ्जनैरिति जिज्ञासायां पृष्ठतस्तावदाद्यै रित्येकशेषादेकेन द्वाभ्यां त्रिभिश्चतुर्भिर्वा व्यञ्जनैः, उत्तरतस्तूत्तरैरित्येकशेषादेकेन, द्वभ्यां त्रिभिरेव वा संपृक्तस्याक्षरत्वं नियम्यते । तत्र पृष्ठार्केणाभिनिगृहोता अशितयश्चत्वार्य्युपसृष्टानि व्यञ्जनानि । पुरतोऽर्केण त्वभिनिगृहीता अशितयस्त्रीण्युपहितानि व्यञ्जनानि । तान्युभयान्यस्यात्मनः स्वरस्याङ्गानि भवन्ति । तत्रेयं वाक् पृथ्वीरसः । स्वरः सूर्य्यरसः । तथा च पृथिव्याः सूर्याङ्गत्व-मिवैतस्या वाचः स्वरप्राणाङ्गत्वं वेदितव्यम् ॥१॥

अथाहुः । अपृक्तस्य व्यञ्जनसंपृक्तस्य वा स्वरस्यैतत्कात्यायनोक्त-मक्षरत्वं स्वरान्तरासन्निधाने साधूपपद्यते । किन्तु यत्रानेकस्वरमेकं पदं तत्र स्वरद्वयमध्यवर्त्तिनां व्यञ्जनानां पूर्वाङ्गत्वं वा पराङ्गत्वं वेति संशयः । यथा अपक्वस्त्यानमिति पञ्चाक्षरे पदे शुद्धोऽकारः । पयुताऽकारः । कवयुताऽकारः । सतययुताऽकारः । नपूर्वो मोत्तर-श्चाऽकारः—इत्येवं तानि पञ्चाक्षराणि भवन्ति । तत्र पकार-ककारसकारादीनां पूर्वाङ्गत्वं कस्मान्नास्तीति शङ्कायामुच्यते । स्वरस्य पृष्ठतः पुरतो वा बलतारतम्यं भवतीति स्वरद्वयसत्वे पूर्वस्य परस्य वा स्वरस्य बाध्यबाधकभावेनैकत्र बलोपक्षयाद् व्यञ्जनविशेषे संक्रमणबलमेकस्य प्रतिरुध्यते । यथा कुलशब्दे लकारस्य पराङ्गतया पूर्वाङ्गत्वाऽनुत्पत्तिः । अधिकेन परबलेनाल्पस्य प्रत्याहतत्वाद् । तच्चेदं बलतारतम्यं स्वरद्वयसन्निकर्षे नियम्यते । तथाहि पञ्चमो विन्दुर्हृदयत्वादुक्थः । तस्मिंश्च पञ्चपादा बलम् । अथ षष्ठे विन्दौ चत्वारः पादा बलम् । तदुभयविन्दुस्थे स्वरे नव पादा बलस्योपपद्यन्ते ।

तैरेव नवपादैर्बलैरयं स्वरः पूर्वपरबिन्दुस्थेषु व्यंजनेषु विभवति। तथा च पञ्चमबिन्दुस्थे तावदुक्थे पूर्णं बलं भवति। अथ उक्थविन्दोः पृष्ठतश्चतुर्षु

पुरतश्च सप्तमादिषु त्रिषु विन्दुषु क्रमेणाक्रमणबलं पादतो ह्रसति इति निसर्गः ।

अनुष्टुब् वाक्	उपसर्ग-व्यञ्जनानि वाक्				स्वरः वाक्		उपधान-व्यञ्जनानि वाक्			
अर्द्धमात्रादेशः	१	२	३	४	५	६	७	८	९	प्राणो बृहती
नवविन्दवः	०	०	०	०	०	०	०	०	०	अक्षरो बृहतीन्द्रः
	१	२	३	४	५		६	७	८	वागनुष्टुप् (वायुः)
स्वरस्याकर्षण बलपादाः	I	I	III	IIII	IIII	IIII	III	II	I	स्वरबलानि वाचि
	अर्धमात्रावच्छिन्नैर्नवभिः प्राणैरवच्छिन्नं मनो वाङ्मयं भवति॥१॥ मनःप्राणवाङ्मयमेकमक्षरमव्ययकोशत्रयपर्य्याप्तम् ॥२॥									

तेन हरि-शब्दस्य रेफे पूर्वस्वरबलं त्रयः पादाः । परस्वरबलं तु चत्वारः पादास्तेन रेफः पराङ्गम् । [कात्स्न्यम्] इत्यत्र तकारे पूर्वस्वरबलं द्वौ पादौ; परस्वरबलं त्वेकः पादः । तेन तकारः पूर्वाङ्गम् सकारे पूर्वस्वरबलमेकः पादः । परस्वरबलं द्वौ पादौ । तेन सकारः पराङ्गम् । [ऊर्क् स्त्र्यङ्गे] इत्यत्र, ककारे पूर्वस्वरबलं द्वौ पादौ, परस्वरबलं तु तत्र नास्तीति ककारः पूर्वाङ्गम् । सकारे तु पदान्तयत्याऽर्द्धमात्रिकया विच्छेदात् पूर्वस्वरबलं त्रयः पादाः । परस्वरबलं त्रयः पादाः । बलसाम्यादुभयतोऽयमाकृष्टस्तकारो द्विरुच्यते । तदित्थं बलवैषम्ये यस्य बलाधिक्यं यत्र व्यञ्जने क्रमते तत् तस्याङ्गम् । तदेतन्निष्कृष्याह कात्यायनः । **"संयोगादिः पूर्वस्य । यमश्च । क्रमजं च । तस्माच्चोत्तरं स्पर्शे । अवसितं चेति।"** (१।१०२।१०६) तर्कः । गुल्मः । हव्यम् । पत्नी । सत्यम् । इत्यादिषु मध्यवर्त्तिनो व्यञ्जनयोरेकं पूर्वाङ्गं द्वितीयं पराङ्गम् । अन्तस्थोष्मभिन्नानां संयुक्तानामवसितानां च व्यञ्जनानामुच्चारणं द्वेधा

अञ्जसा विक्रम्य चेति। "**यथैवोपक्रमेद् वर्णांस्तथैवैतान् समापये**"दिति नियम्योच्चारयतां पदमध्ये बलविशेषप्रयोगाभावोऽञ्जसोच्चारणम्। सत्यमिति। अत्र स्पर्शस्य तकारस्य तर्कगुल्मादयन्तःस्थवन्मृदुग्रहः। तत्रेदं तकारस्य पूर्वाङ्गत्वमुक्तम्। अथ विक्रम्योच्चारणे तु स्पर्शे बलविशेषोदयात् पूर्वः स्वरो विक्रमते। तेन स्पर्शान्ते विच्छिद्य पुनरुत्तरवर्णोच्चारणाय प्रयत्नलाभः। तत्र "**संयोगविभागशब्देभ्यः शब्द**" इत्यौलूक्यशास्त्रात् संयोगजस्पर्शानन्तरं विभागजः पुनरन्यः स्पर्श उदेतीति वर्णद्विरुक्तिर्भवति। तथा चैवं संयोगादेर्वर्णस्य द्वित्वसिद्धं व्यञ्जनं क्रमजं तत्पूर्वाङ्गम्। सत्यमिति तद्वित्वे प्रथमः पूर्वस्य। तयौ परस्याङ्गम्। रुक्‍मइति कयमौ पूर्वस्य। मः परस्य। रहयोस्तु संयोगादित्वे परः स्पर्शो द्विरुच्यते। यथा पार्श्व्यमिति रात्परः शः क्रमजः पूर्वस्य। शवयाः परस्य। वर्ष्‍ष्यायेति रात् षः पूर्वस्य। षयौ परस्य। बाह्वोरिति हाद्वः पूर्वस्य। वः परस्य। क्रमजादुत्तरं व्यञ्जनं स्पर्शे परे पूर्वाङ्गम्। यथा पार्ष्ण्या इति रषषाः पूर्वस्य, णयौ परस्य। वर्ष्मन् इति रषषाः पूर्वस्य मः परस्येति॥

"**ङ्णोः कुक् टुक् शरि। नश्च। शि तुगि**ति पाणिनीयैः सूत्रैर्विधीयमानाः कटधताः पूर्वस्पर्शद्विरुक्तिरूपा एवावधीयन्ते। ङणनानां ह्रस्वात्परेषां स्वरप्रत्यये द्विरुक्तिरिव स्वरभक्तिमदूष्मप्रत्ययत्वेऽप्युच्चारणसंप्रदायक्रमानुरोधात् क्वचित् स्वरमात्रात् परेषां द्विरुक्तिः प्रवर्त्तते। किन्तूष्मणां नासिक्यप्रतिपन्थितया नासिक्यता निवर्ततइति प्राङ्क्षष्ठः, सन्त्सः सञ्च्शम्भुरिति रूपाणि। सञ्शम्भुरित्यत्र तु प्रतिगृह्यत्वाद्विरत्योच्चारणाच्च नासिक्यताया अनिवृत्तिः। एषु सर्वत्र द्वित्वसिद्धस्य पूर्वाक्षराङ्गत्वं नेयम्।

कात्स्न्र्यमित्यद्वयान्तराले अ, र, त, स, न, याः षड्वर्णाः। तेष्वरताः पूर्वमक्षरं सनयाः परमक्षरं भजन्ते। पृष्ठतो बलेन तकारे परस्य पुरतो बलेन सकारे पूर्वस्याक्रमणेऽपि विप्रतिषेधे मूलबलात् सिद्धिरिति न्यायेन कृत्स्नशब्दव्यवस्थाऽनुरोधात् सामञ्जस्योपपत्तेः। तकम्यमित्यत्र कमये पूर्वस्य, यमके परस्य बलप्रयोगाद् विप्रतिषेधे

सन्निकर्षातिशयात् कस्य पूर्वांगत्वेऽपि मययोः पराङ्गत्वमेव। विप्रतिषेधे परं कार्य्यमिति न्यायेन पुरतो बलापेक्षया पृष्ठतो बलमतिशेत इति मध्यमकारे पराङ्गत्वसिद्धेः। वैदिकानां तु समये पूर्वबलावष्टब्धेऽपि ककारे परबलं प्रसज्जत इति बलद्वयविरुद्धप्रत्याकर्षात् कद्वयसिद्धिः तक्कम्यमिति। तत्रोत्तरके मप्रयत्नाक्रमणान्नासिक्यत्वमिति यमसंज्ञा क्रियते ॥ [विश्वप्स्न्या] पः पूर्वाङ्गम्। सः पराङ्गम्। [विष्वक्पाशः] इति बलसाम्येऽपि कः पूर्वाङ्ग न पराङ्गम्। पदान्तयत्या विच्छेदात्। तदित्थं स्वरानेकत्वे बाध्यबाधकभावो व्याख्यातः ॥*॥

उक्तं पूर्वम्। अयुक्तः, सति व्यञ्जने व्यञ्जनसंपृक्तः स्वरोऽक्षरं भवतीति। तत्र सप्त व्यञ्जनान्येकेन स्वरेण ग्रहीतुं शक्यन्ते। यथा [स्त्र्यर्क्ट्] इति। स. त. र. य. अ. र. क. ट.—वर्णैरष्टवर्णं सप्तव्यञ्जनं नवविन्दुकमकारात्मकमेकमक्षरं भवति। तत्राकारो वर्णमात्रं न त्वक्षरम्। सोऽयं वर्णोऽकारः सप्त व्यञ्जनानि चाकारात्मकस्याक्षरस्याङ्गानि। तदुच्चारणाधीनोच्चारणत्वात्। नातोऽधिकमस्य स्वरस्य व्यञ्जनाभिनिग्रहणे सामर्थ्यम्। अत एव तु पृष्ठतः पञ्चमं पुरतो वा चतुर्थं यदि व्यञ्जनमुपदध्याद्—अवश्यं तर्हि तदुच्चिचारयिषावशाकृष्टः कश्चिदन्यः स्वरस्तत्र प्रसज्येत। तदुच्चारणाय पूर्वस्वरस्यालब्धबलत्वात्। यथा [न स्त्र्यर्क्टप्] इत्यत्र नकारे तकारे च स्वरो हठादासज्जते ॥ **इति द्वितोयः खण्डः॥**

अथातोऽस्मिन्नक्षरे दैवतानुध्यानमाख्यास्यामः। निरवयवे मनसि तावत् समावृतो नव प्राणखण्डाः संनिविशन्ते। प्राणमयास्ते कोशाः। प्राणात्मकेषु च तेषु नवविन्दुषु पञ्चमो विन्दुर्नभ्यत्वादात्मा। इतरेऽष्टावङ्गानि। पंचमविन्दुस्थः स्वरोऽक्षरम्। स चायमैन्द्रवायवो ग्रहो वाच आत्मा। स हि प्राणो वाङ्मयत्वाद्रिन्द्रो नामोच्यते। अयमेव प्राणः सरस्वत्यधिष्ठाता सरस्वान्नामाभिधीयते। यथोक्तं बृहद्देवतायाम्—

"सरांसि घृतवन्त्यस्य सन्ति लोकेषु यत् त्रिषु ॥

सरस्वन्तमिति प्राहुर्वाचं प्राहुः सरस्वतीम् ॥,, इति केचिदाहुः ॥

यद्यपीयं सर्वा वाक् पार्थिवत्वादाग्नेयी प्रतिपद्यते । **"तस्य वा एतस्याग्नेर्वागेवोपनिषत्"** इति श्रुतेः (१० । ३ **प्र.** । ५ **ब्रा.**) तथापीयमिन्द्रेण प्राणेनाधिष्ठितत्वात् तेनैकीभावादैन्द्री भवति । स चायमिन्द्रः प्राणो द्विविधः आन्तरीक्ष्यो दिव्यश्च । तत्रायं दिव्येन्द्रः प्रज्ञाप्राणः । स च वितायमानायां ध्वनिरूपायां वाचि विवेचयन् स्वरं व्यंजनं चैवं संविभाजयति । अथान्तरीक्ष्यो वायुना सजूर्भवति । इन्द्रतुरीयो वायुरैन्द्रवायवो ग्रहो भवन्नाग्नेयीमिमां सर्वां ध्वनिवाचमध्यास्ते । गायत्रो ह्यग्निः । अग्निदैवतत्वाच्चेयं वाग् गायत्री । अष्टभक्तिर्हि गायत्री । तेन स्वरमेकमनुगतानि सप्त व्यंजनान्येकमक्षरं वाक् । तस्या वाचोऽयमुक्थांशः स्वरो नामैतेषु नव-विन्दुषु पंचमं षष्ठं च विन्दुमधिष्ठिति । प्राणस्त्वयमिन्द्रांशो बृहती-रूपत्वान्नव विन्दूनभिव्याप्यावतिष्ठते । तथा च श्रूयते—**"यावद् ब्रह्म विष्ठितं तावती वाक्"**—इति । **"यत्र ह क्व च ब्रह्म तद् वाक् । यत्र वाक् तद्वा ब्रह्म ।"** इति च ॥ (ऐ. आ. · · · · · ·) इन्द्रो ह वाचां ब्रह्म । इन्द्र आत्मा ब्रह्मेत्येकार्थाः । यथायं शारीर आत्मा सर्वां शरीरयष्टिमभिव्याप्यावतिष्ठते—एवमयमिन्द्रो वागात्मा नव विन्दूनभिव्याप्नोति । एतावदेवास्य वाङ्मयस्येन्द्रस्य शरीरं प्रतिपद्यते । तस्य शरीरस्य भागे यावन्ति व्यंजनानि सम्प्रविष्टानि भवन्ति तावतीयं वाक् तस्मादिन्द्रात् परिमीयते । अष्टवर्णैर्नवविन्दु-भिश्च परिमिता हीयमेकाक्षरा वाक् सिद्धा भवति । तमेतमर्थं भगवान् कुरुसुतिः काण्वो वेदगुरुषः प्राह—

"वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशम् ॥"

इन्द्रात् परितन्वं ममे—इति ॥ ऋ० सं० ८ । ७६ । १२ ।



षट्त्रिंशदक्षरो बृहतीरूपः प्राण इन्द्रः। तस्येन्द्राख्यप्राणस्य तनूं परि। इत्थंभूताख्याने परिशब्दः। अष्टापदीं नवस्त्रक्तिम्। ऋतस्पृशं वाचं ममे परिमापितवान्। अष्टौ हि चतुरक्षराणि भवन्तीति द्वात्रिंशदक्षराऽनुष्टुबियमष्टापदी वाक्। पुनरप्येकेन चतुरक्षरेण पादेन बृहती सम्पद्यमाना नवस्त्रक्तिः। स्त्रक्तयः कोणाः। सेत्थमियमनुष्टुप् वाक् तमृतं बृहतीप्राणं स्पृशति। बृहत्यामनुष्टुभोऽन्तर्भावादिह वाचः प्राणेनैकीभावो विवक्षितः। इत्यारण्यकश्रुत्यनुसारिणी व्याख्या (ऐ० आ० २।३।६)॥ ऋतस्पृशमित्यस्यानुष्टुब् वाग् बृहत्या स्पृष्टेत्यर्थमाह सायणः। ऐतरेयश्रुतिस्तु **"सत्यं वै वागृचा स्पृष्टे"** त्यर्थमाह। तथा चायं श्रोत्रग्राह्यः शब्दः सत्यं वाक्। सहृदयत्वात्। सा ऋतवाचा निर्हृदयया नित्यं स्पृष्टा भवतीत्यर्थः प्रतिपत्तव्यः।

अयमत्राभिसंधिः। ऋतं च सत्यं चेति द्वे नेत्रे भवतः। नेत्रं सूत्रम्। तत्र हृदयतोग्राहि नेत्रं सत्यं नाम। सर्वतोग्राहि तु नेत्रमृतं नाम। तथा चाऽशरीरमहृदयं सर्वमेव ऋतनेत्रगृहीतत्वाद् ऋतमुच्यते। हृदयेनाकृष्टत्वात्तु सहृदयं सशरीरं सत्यम्। आपो वायुः सोम इति ऋतानि, अशरीरत्वात्। अग्निर्यम आदित्य इति सत्यानि, सशरीरत्वात्। तत्राप इति पारमेष्ठ्यमण्डलस्थां सुब्रह्मण्यानाम्नीं वाचमाह। यां त्वेतामष्टापदीं गायत्रीनाम्नीं वाचं ब्रूमः, सा सर्वापि स्वयोनिरूपां तामृतवाचं स्पृशन्त्येव रूपं धत्ते। तत्प्रभवा, तत्प्रतिष्ठिता, तत्रैवान्ते विलीयते। तस्मादाह-ऋतस्पृशमिति। आपो हि सा वाक्। **"सोऽपोऽसृजत वाच एव लोकात्। वागेवास्य साऽसृज्यत। सेदं सर्वमाप्नोद् यदिदं किञ्च तस्मादापः** इति श्रुतेः (श० ६।१।१।६) सा ऋतम्। यस्त्वयमत्र प्राणः तत्सत्यम्। **"आप एवेदमग्र आसुः।**

ता आप: सत्यमसृजन्त (शत० १४ कां० ६ प्र० ६ ब्रा०) इति श्रुते:। प्राणस्तावदिन्द्र: सोऽप्सु वाक्षु द्वेधा विनियुज्यते। सत्यात्मना प्रज्ञात्मना च। तत्र प्रज्ञाप्राणेन वर्णाक्षरपदवाक्यादिविभागा भवन्ति। मानुषोष्वेव तु वाक्षु स प्रज्ञाप्राणोऽधिकुरुते न त्वव्याकृतासु वायुतेजोजलपृथिवीनां वाक्षु। सत्यप्राणस्त्वयं सर्वास्वेव वाक्ष्वविशेषेणाधिकुरुते सत्येनागर्भितानामपां वाचामनात्मतया स्थातुमनर्हत्वात्। आसामेव ऋताख्यानां वाचां समुद्र: सरस्वान्नाम। सेयमशरीरा विभ्वी वाक्। अथ सत्यवैशिष्ट्येन तदवच्छिन्नतया सा वाक् सशरीरा सती सरस्वती॥ अपरिच्छिन्नत्वाद् ऋतं सरस्वान्। परिच्छिन्नत्वात् सत्यवती सरस्वती। सोऽयं सत्य-प्राण एव प्रज्ञाप्राणेन विभाजितोऽक्षरं भवति। स आत्मा। स स्वर:। सोऽङ्गी। व्यञ्जनानि तु क्षराणि तान्याङ्गनि। एकेन विन्दुना त्वेतमात्मानं वर्द्धयति। स पञ्चमविन्दुस्थ: षष्ठं बिन्दुमप्यवगाहमान: सन्नेकमात्र: सम्पद्यते। वीर्य्याधिक्या-द्ध्येक: कश्चिदात्मा चाङ्गी च भूत्वा सर्वाण्यङ्गान्यधीष्टे इति हि न्यायो यजु:श्रुतौ षष्ठे काण्डे व्याख्यात:। (श०६।१प्र०।१ ब्रा०।६कं० तेनार्द्धमात्राणां व्यंजनानामयमेकमात्र: स्वरो मात्राधिक्यादात्मा भवति। आत्मत्वाच्चायं स्वरस्तेषु व्यञ्जनेषु प्रभवति। सर्वाणि व्यंजनान्यात्मसा-त्कुरुते। तथा चैकमात्रादात्मबिन्दो: पृष्ठतश्चत्वारोऽर्द्धमात्राबिन्दव उपसर्गस्थानानि। पुरतस्तु त्रयोर्द्धमात्राबिन्दव उपधानस्थानानीत्येव-मष्टौ विन्दवो निष्कृष्यन्ते। एतदभिप्रायेणैव श्रूयते—

"ब्रह्म वै गायत्री वागनुष्टुप्—(ऐ. आ. १। १४)

१	२	३	४	५	६	७	८	६	बृहती
०	०	०	०	०	०	०	०	०	प्राणा:
व्य.	व्य.	व्य.	व्य.	स्वर:		व्य.	व्य.	व्य.	वाच:
I	II	III	IIII	IIII–IIII		III	II	I	अक्षरबलानि
१	२	३	४	५		६	७	८	अनुष्टुप्

"वागनुष्टुप्"— (शत १।५।२।२७) इत्याचक्षाणा वैदिकमहर्षयोऽक्षरस्यैतस्याष्टविन्दुत्वमभिप्रयन्ति। स्वरस्यैकस्य व्यञ्जनद्वयसमानावगाहितया नवव्यञ्जनसंनिवेशावकाशस्यैकस्वरकसप्तव्यञ्जनसंनिवेशावकाशेन तुल्यत्वाद् बृहतीप्राणावच्छिन्नस्याक्षरस्य वागवच्छेदेनाष्टभक्तिकत्वं संभवतीत्यक्षरात्मिकाया वाचोऽनुष्टुप्त्वमुपपद्यते। अष्टभक्तिकस्य छन्दसो गायत्रीत्ववदनुष्टुप्त्वेनापि व्यपदेशसंभवात्। अथवैकैकमक्षरमष्टभक्तिकं भवतीति चतुरक्षरच्छन्दसो द्वात्रिंशद्भक्तिकत्वं संभवति। चतुरक्षराणि सर्वाणि च्छन्दांसि श्रूयन्ते (शत० १।५।२।२७)। चतुर्विंशत्यक्षरा गायत्री, अष्टाविंशत्यक्षरा उष्णिगित्येवं विंशत्यक्षराया द्विपदाविराज ऊर्ध्वं चतुर्भिश्चतुर्भिरक्षरैरनुवर्द्धितैर्गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीनामुपपन्नतया छन्दोभिरुपलक्षितायाः सर्वस्या वाचो द्वात्रिंशद्भक्तिकानुष्टुप्त्वमुपपद्यत इति बोध्यम्।

प्रत्यक्षरं नवविन्दुषु हृदयस्थस्वरस्थानतया पञ्चमषष्ठविन्द्वोरात्मत्वम्। इतरे सप्त विन्दवस्त्वात्मनः क्रान्तिस्थानत्वान्महिमानो भवन्ति। पञ्चमषष्ठविन्दुस्थस्य स्वरस्वरूपनिरूपकस्य प्रज्ञाप्राणस्येन्द्रस्यं संपरिष्वक्तोऽयमक्षर-स्वरूप-निरूपकः प्रज्ञाप्राणोऽन्य इन्द्रः सप्तव्यञ्जनवर्णानष्टमं स्वरवर्णं चाभिव्याप्नोतीति प्रतीयते। अत एव च बृहतीच्छन्दसोऽप्यस्येन्द्रस्यानुष्टुप्चारित्वमप्युपपद्यते। तथाचाहुर्वेदमहर्षयः-

बीभत्सूनां सयुजं हंसमाहुरपां दिव्यानां सख्ये चरन्तम्।
अनुष्टुभमनु चर्चूर्यमाणमिन्द्रं निचिक्युः कवयो मनीषा॥
(ऋक् सं० मं० १०, सू० १२४, मन्त्र ९)॥इति॥

अयस्तावदस्य मन्त्रस्यार्था भवन्ति। अधिदैवतमधिशब्दमधिभूतं च। तत्राधिदैवतमर्थो ब्रह्मविज्ञाने सिद्धान्तवादे द्रष्टव्यः। इहाधिशब्दं व्याख्यायते। बीभत्सूनां बन्धनमिच्छतां निराश्रयं स्थातुमसमर्थतया परावलम्बनमपेक्षमाणानां क्षराणां व्यञ्जनानां सयुजम् आश्रयदानेन सहयोगिनं कंचिदर्थं हंसं ब्रुवते। स्वातन्त्र्येण स्थातुम-

शक्नुवानान् व्यञ्जनरूपान् क्षरानर्थानाश्रयो भूत्वा यः स्वस्मिन्नुपबध्नाति सोयमैन्द्रवायवग्रहः प्रकृते हंस इति वेदितव्यः ।

"ये अर्वाङ् उत वा पुराणे, वेदं विद्वांसमभितो वदन्ति ।
आदित्यमेव ते परिवदन्ति सर्वे, अग्निं द्वितीयं तृतीयं च हंसम्"

इवि मन्त्रश्रुतौ हंसपदस्य वायुपरत्वावगमात् । प्राणो वायुरिति श्रुतेः प्राणः स हंसो भवति । प्राण एव त्वक्षरसंज्ञः क्षरान् व्यञ्जनवर्णानात्मनि बध्नाति । अथेहाऽऽप इति वाचः प्रतिपत्तव्याः । **"सोपोऽसृजत वाच एव लोकात् । वागेवाऽस्य साऽसृज्यत । सेदं सर्वमाप्नोद् यदिदं किञ्च तस्मादापः"** इति यजुःश्रुतेः [शत० कां० ६ प्र० १ ब्रा० १]तासां दिव्यानां तृतीयस्यामितो दिवि पवमानानां वाचां सख्ये समानभावेऽयं हंसश्चरति । ऐन्द्रवायवेन प्राणेनेयं वाग्, वाचा चायमैन्द्रवायवप्राणोऽव्यतिरिक्तं रूपं धत्त इति भावः । अष्टवर्णात्मिका वागनुष्टुप् । तामनु । इत्थंभूताख्यानेऽयमनुशब्दः कर्मप्रवचनीयः । अनुष्टुप्छब्देनेहाष्टवर्ण-संनिवेशस्थानरूपा नव बिन्दवो लक्ष्यन्ते । नवबिन्दूनभिव्याप्य कृतात्मानमिहाक्षरशब्देन प्रतिपन्नं तावदिन्द्रं प्रज्ञाप्राणं वैज्ञानिकाः स्वमनीषया विचारदृष्ट्या निचिक्युर्निर्धारयामासुः । यद्यपि वागेव श्रोत्रेण श्रूयते न प्राणस्तथाप्यक्षरात्मिकाया वाचोऽष्टवर्णाविच्छिन्नतया वाचस्तावत्प्रदेशावगाहित्वासंभवाद् वाचोऽतिरिक्तं वागालम्बनं कंचिदिन्द्रं नाम प्राणं विद्वांसः स्वबुद्धिभावनया ददृशुरित्यर्थः ॥ इत्थमिदमधिशब्दं व्याख्यातम् ।

अथैतस्य भूतग्रामस्य वाङ्मयत्वादधिभूतपक्षेऽपि तुल्योऽर्थः । अतएव–

"अप्रक्षितं वसु बिभर्षि हस्तयोरषाढं सहस्तन्वि श्रुतो दधे ।
आवृतासोऽवतासो न कर्तृभिस्तनूषु ते क्रतव इन्द्र भूरयः ॥
(ऋ० सं० मं० १ सू० ५५ मन्त्रः ८१)

इति मन्त्रं व्याचक्षाणाऽऽरण्यकश्रुतिः **"सोयमाकाशः प्राणेन बृहत्या विष्टब्धः ॥ तद्यथाऽयमाकाशः प्राणेन बृहत्या विष्टब्धः, एवं**

सर्वाणि भूतान्यापिपीलिकाभ्यः प्राणेन बृहत्या विष्टब्धानीत्येव विद्याद्"—(ऐ० आ० २।१।६) इत्येवं शब्दाक्षरवद् भूताक्षरेष्वपि बृहतीप्राणात्मकस्येन्द्रस्य तुल्यमभिव्याप्तिमाचष्टे। तदिदं विस्तरतो ब्रह्मविज्ञाने व्याख्यातं द्रष्टव्यम् ॥*॥

॥इति तृतीय. खण्डः ॥३॥

एतच्च सप्तव्यञ्जनं स्वरक्रान्तिमण्डलं सति संभवे व्याख्यातम्। न त्वक्षरत्वप्रयोजकतया सप्तानां व्यञ्जनानामेकान्ततः सद्भावोऽपेक्ष्यते। नवानामर्द्धमात्राबिन्दूनां स्वरूपसद्योग्यतालक्षणतया व्यवस्थितत्वेऽपि फलोपधायकतालक्षणतया सर्वत्रानुपलब्धेः। तथा चोपपद्यते व्यञ्जनात्यन्ताभावे स्वरस्यैव केवलस्याक्षरत्वम्। किन्तु यत्र व्यञ्जनसद्भावस्तत्र तद्विशिष्टस्यैवाक्षरत्वं न तु केवलस्येत्यपि प्रागुक्तं न विस्मर्तव्यम्। तत्रापि चैकेनैव व्यञ्जनेन द्वाभ्यां त्रिभिश्चतुर्भिः पञ्चभिः षड्भिः सप्तभिर्वा वैशिष्ट्ये स्वरस्याक्षरत्वं द्रष्टव्यम्। न वाक्, प्रागित्यादि॥ इदं पुनरत्रावधेयमीषत्स्पृष्टार्धस्पृष्टैः स्वरच्छायापन्नैरन्तःस्थोष्मभिरुपसर्गोपधानयोः सगर्भत्वे सत्येवेदं स्वरक्रान्तिमण्डलं सप्तबिन्दुकमुपपद्यते। अन्तःस्थोष्मणोरप्रत्यासत्तौ त्वाक्रमणबलं तदपचीयते। [क्त्न ट् प्] इति पृष्ठतस्त्रिषु कतनेषु पुरतष्टपयोर्द्वयोरेव बिन्द्वोराक्रमणबलोपपत्तेः। तदित्थं वर्णविशेषे क्रमणबलतारतम्यमन्वीक्ष्यम्। यथा खल्वस्य क्रान्तिबलं तारतम्येन घटते। एवमाभ्यन्तरस्थानामपि कण्ठादीनामाभ्यन्तरप्रयत्नानां च स्पृष्टादीनामस्ति बले तारतम्यम्, बाह्यस्थानानां बाह्यप्रयत्नानाञ्च। तेन षत्वणत्वकुत्वचुत्वादिका आभ्यन्तरस्थाननिबन्धना उदात्तस्वरितानुदात्तप्रचयादिका बाह्यस्थाननिबन्धनाश्च व्याकरणशास्त्रोक्ताः सर्वेऽपि सन्धिफलविशेषा भवन्तीति नैरुक्तानां समयः। राजसु, वित्सु, रामेषु, हरिषु, हवींषीत्यादौ सकारस्योत्तरस्वराङ्गत्वेऽपि पूर्वस्वरबलाक्रमणतारतम्यानुरोधेन स्थानापकर्षात् षत्वमुपपद्यते। [रामाणां षण्णाम्] इति रषनिबन्धनं णत्वम्। वाक्, स्रक्, रक्तम्, निर्णिक्तमित्यादौ कुत्वम्।

सञ्चरित-सञ्जनादिषु चुत्वमित्येवं स्थानप्रयत्नक्रान्तिबलतारतम्य-निबन्धना विशेषा भवन्तीत्यन्यत्र विस्तरः ॥

॥ इति चतुर्थः खण्डः ॥४॥

तदित्थमिदमक्षरस्वरूपं व्याख्यातम् । व्याख्यातश्चास्मिन्नक्षरे स्वरव्यञ्जनयोरङ्गाङ्गिभावः । तत्रैतेष्वङ्गेषु व्यञ्जनेषूपसर्गे सत्यसति वोपधानबलस्य कार्य्योपधायकत्वाभावेऽक्षरस्य लघुत्वं वक्तव्यम् । यथा-अ, य, न्य, क्न्य इत्येवमादयः सत्यप्यधस्तात् व्यापारे ऊर्ध्वतो व्यापाराभावाल्लघवः। उपधाने त्वाक्रमणव्यापारस्य बलोपधायकतायामक्षरस्य गुरुत्वं भवतीति सिद्धान्तः । दीर्घस्वराणां सन्ध्यक्षरस्वराणामनुस्वारविसर्गव्यञ्जनान्तस्वराणां व्यञ्जनद्वयसंयोगपूर्ववर्त्तिस्वराणां चोपहितवर्णोपिततया पुरोऽर्कव्यापारसत्वाद् गुरुत्वमुपपद्यते । यथा—आ, ए, ऐ, अं, अः, अत्र, इत्येवमादयः पुरतो व्यापारवत्वाद् गुरवः । तथा चेत्थं लघुगुरुभेदादक्षरद्वैविध्यं व्यवतिष्ठते ॥*॥

॥ इति पञ्चमः खण्डः ॥५॥

"इति श्रीमधुसूदनविद्यावाचस्पतिप्रणीते पथ्यास्वस्तिग्रन्थे अक्षरपरिष्कारः॥ (४)

॥ चतुर्थः प्रपाठः समाप्तः ॥

——

अथ सन्धिपरिष्कारः पञ्चमः प्रपाठः ॥५॥

इदमेवाक्षरमक्षरान्तरेण संवियोगे परस्परेण बन्धनतो हृदयग्रन्थ्युत्पत्तौ क्षरोत्पत्तिहेतुर्भवति। परब्रह्मविद्यायां क्षरभूतानीव शब्दब्रह्मविद्यायां क्षरा व्यञ्जनवर्णाः। इन्द्रियग्राह्यैः क्षरैरनिन्द्रियग्राह्यो वाक्प्राणोऽभिव्यज्यते तस्मादेषां व्यञ्जनत्वम् ॥

(१) निरूपकभेदात् सन्धित्रैविध्यम्

तत्रायं सन्धियोगः परब्रह्मणीव शब्दब्रह्मण्यपि निरूपकभेदाद् द्विविधः ॥ विभूतिः योगश्च। तत्र योगः पुनर्द्विविधः। संश्लेषः; संपरिष्वङ्गश्च ॥ यत्र युक्तयोरेकं योगाय व्यापारवत् स्याद्, बद्धं सत् परतन्त्रं स्यात्, अपरं तु निर्व्यापारमबद्धं स्वतन्त्रमवतिष्ठते। तत्र व्यापिनो व्याप्येऽनुग्रहो विभूतिः। यथाह—

"अम्भो लवणे वायौ व्योम, मुखे दर्पणे यद्वत् ॥
विभवति तद्वद् विरजा भूतग्रामेऽव्ययः परमः ॥१॥" इति

क्षरेष्वक्षरो विभवतीति नियमादिह व्यञ्जनेषु स्वरो विभवति। यथा 'स्त्र्यर्क्ट्' शब्देऽकारश्चतुर्षु पूर्वेषु त्रिषु चोत्तरेषु व्यञ्जनेष्वालम्बनतया विभवन् दृश्यते।१। क्षरेषु चान्यतरस्यान्यतरस्मिन् विभूतिः। यथा रामाणां वर्ष्मणामित्यत्र मूर्द्धन्ययो रषयोः प्रयत्नमहिम्ना दन्त्यो नकारो मूर्द्धन्यतामापद्यते ॥२॥ अथैतेष्वेव स्थानेषु व्याप्यस्य व्यापिनि योगः संश्लेषः ॥ तमेकतो बन्धयोगमाचक्षते।

"अम्भसि लवणं, वायुर्व्योम्नि मुखं दर्पणे यद्वत् ॥
श्लिष्यति तद्वद् विरजसि भूतग्रामोऽव्यये परमे ॥१॥"

एवमिह व्यञ्जनान्यबद्धे स्वरे संश्लिष्टानि बद्धानि ॥३॥ क्षराणां चैकस्यान्येन संश्लेषः ॥ तत्र संश्लेषणाद्व्ययोगादेकस्यान्येन बन्धनमात्रं न त्वन्यस्मिन्नन्यस्यानुप्रवेशः ॥ एतदभिप्रायेणैवाह भगवद्गीतायाम्—

"मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ॥
मत्स्थानि सर्वभूतानि नचाहं तेष्ववस्थितः ॥६।४॥
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ॥
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥६।५॥
यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ॥
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥६।६ ॥इति॥

मत्स्थानीति संश्लेशात्मकमेकतो बन्धनमाह ॥

नचाहं तेष्विति परस्य तत्राबन्धनमाह । न च मत्स्थानीति-समन्वयलक्षणानुप्रवेशप्रतिषेधमभिप्रैतीति विवेक्तव्यम् ॥*॥

(२) व्यञ्जनभेदात् संश्लेष-साप्तविध्यम् ॥

स हि संश्लेषो व्यञ्जनभेदात् सप्तविधो याज्ञवल्क्येन स्मर्य्यते ।

अथ सप्तविधाः संयोगपिण्डाः :—

"यमान् विद्यादयस्पिण्डान् सान्तःस्थान् दारुपिण्डवत् ॥
अन्तःस्थयमवर्जं तु ऊर्णापिण्डं विनिर्दिशेत् ॥१॥
अन्तःस्थयमसंयोगे विशेषो नोपलभ्यते ॥
अशरीरं यमं विद्यादन्तःस्थं पिण्डनायकम् ॥२॥
ज्वालापिण्डान् सनासिक्यान् सानुस्वाराँस्तु मृन्मयान् ॥
सोपध्मान्वायुपिण्डाँस्तु जिह्वामूले तु वज्रिणः ॥३॥

अग्निः पत्क्नीत्ययस्पिण्डः ॥१॥ अत्र पञ्चमापञ्चमयोर्मध्यवर्तिनो विच्छेदस्याशरीरत्वाद्विशेषानुपलब्धिः ॥ सत्यम् । अश्वः । विल्मिने । इति दारुपिण्डः ॥२॥ अत्रान्तःस्थानां लघुप्रयत्नतरत्वादात्यन्तिक-संनिकर्षेण पिण्डनायकत्वाद्विशेषानुपलब्धिः ॥ अश्मन् । कृष्णः । अस्मै-इत्यूर्णापिण्डः ॥३॥ ब्रह्म । वह्निः । गृह्णामीति ज्वालापिण्डः ॥४॥ संस्थाम् । सꣳस्तुप् । सिंह्यसीति–मृत्पिण्डः ॥५॥ द्यौᳲपिता इति वायु-पिण्ड. ॥६॥ इᳲकृतिः—इति वज्रपिण्डः ॥७॥

(३) वीर्य्यभेदात् संपरिष्वङ्गद्वैविध्यम् ।

अथ वीर्य्यभेदात्संपरिष्वङ्गः स चान्योन्यतो बन्धनरूपः । अक्षरस्याक्षरेण योगः संपरिष्वङ्गः । यथायं शारीरको विज्ञानात्मा प्राज्ञेनात्मना संपरिष्वक्तो भवति; एवमेकः स्वरः स्वरेणान्येन सन्धीयते । यथा नदीयं भानूदय इत्यादौ स्वरद्वयसंपरिष्वङ्गः । दिव्यस्ति, दिक्वस्ति, दात्रस्ति, इत्यादिषु परस्वरेणेकारादीनां योगः ॥ तत्रेदं त्रयं संभाव्यते । दम्भनेन समञ्चनं भवतीत्येकमात्रस्यार्द्धमात्रत्वं निष्पद्यते ॥१॥ अथवा अन्योदरेऽन्याङ्गप्रवेशो भवतीत्यत इकारस्य षष्ठे बिन्दावकारपञ्चमबिन्दुसमावेशादिकारस्यार्द्धमात्रमवशिष्यते ॥२॥ अथवा संहितयोरुभयोरन्यतरस्य वाऽङ्गक्षतं भवतीत्यत इकारस्याकारे युज्यमानस्य परमर्द्धमात्रमावृश्च्यते इति पूर्वार्द्धमात्रमवशिष्यते ॥३॥ एतेषु फलतो विशेषो नास्तीत्यस्तु यद्वा तद्वा ॥

"**इग्यणः संप्रसारणम्**"—इति ब्रुवतो भगवतः पाणिनेस्तु समञ्चने पक्षपातः । समञ्चितस्यैव संप्रसारणसंभवात् । अनुप्रविष्टस्य तूद्धरणमवक्ष्यत् । क्षतस्य वाऽनुसंपत्तिमवक्ष्यत् । श्रुतिरपि समञ्चनप्रसारणयोरेवानुजानीते । श्रूयते हि सार्वायुषाग्निविद्यायाम्—

"अथातः समञ्चनप्रसारणस्यैव । पशुरेष यदग्निः ।
यदा वै पशुरङ्गानि संचाञ्चति प्र च सारयति ।
अथ स तैर्वीर्य्यं करोति । प्राणो वै समञ्चनप्रसारणम् ।
यस्मिन्वा अङ्गे प्राणो भवति तत् संचाञ्चति प्र च सारयति"॥इति।

[शत० ६।१।१४]

एतेन परब्रह्मणीव शब्दब्रह्मण्यपि वाक्प्राणस्य समञ्चनप्रसारणाभ्यामेव व्यञ्जनस्वरसिद्धिरवकल्पते । तथाहि—व्यञ्जनानां संप्रसारणात् स्वरत्वं संपद्यते । स्वराणां तु समञ्चनात् व्यञ्जनत्वं भाव्यते ॥ तच्चेदं समञ्चनं स्वरद्वयसंपरिष्वङ्गादियोगविशेषादेवोपपद्यते ॥

(४) योगभेदात् संधिद्वैविध्यम्

अथ संनिकर्षभेदात् सन्धिर्द्विविधः । संक्रान्तिः, संहिता चेति । तथाहि पूर्वोक्ता विभूति-संश्लेष-संपरिष्वङ्ग-लक्षणास्त्रिविधा योगाः शाब्दिकनये सन्धिशब्देनाख्यायन्ते । अथ तत्र विभूतिरेका व्यवायसहा भवति सा संक्रान्तिः । संश्लेषसंपरिष्वङ्गौ तु शब्दविद्यायां संहितानाम्नाख्यायेते । यथाह कात्यायनः प्रातिशाख्ये—

"वर्णानामेकप्राणयोगः संहितेति ॥"

स चैकः प्राणः स्वरस्य क्रान्तिमण्डलमनुष्टुप्छन्दः ॥

"प्राणा वै वा वयोनाधाश्छन्दांसि वै देवा वयोनाधाः–इति श्रुतेः । (शत० ६।१ प्र०।६ब्रा०) ॥

प्राणविशेषस्यैवावच्छेदकतायां छन्दस्त्वसिद्धेः एकप्राणयोगो व्यवायेऽपि संभवतीति तत्प्रत्याख्यानाय पाणिनिः—**"परः सन्निकर्षः संहितेत्याह ।** कः परः सन्निकर्ष इति चेत् स्वारसिकार्द्धमात्राकालमात्रव्यवायेनोच्चरणं संहितेति केचिदाहुः । तदसत् । अवग्रहादौ पदद्वययोगेऽर्द्धमात्राकालप्रतिपत्तावपि वर्णद्वययोगे तावद्विच्छेदानुभवाभावात् । तस्मादर्धमात्रातोऽप्यल्पकालोऽवकाशः संहिता । द्वयोर्वर्णयोर्वर्णान्तरेणाविच्छेदः संहिता । वर्णान्तरान्तरितयोस्तु वर्णयोः संनिकर्षः संक्रान्तिः । सोऽयं संक्रान्ति-संहिताभेदाद् द्विविधः सन्धिर्व्याख्यातः ।

(५) आश्रयभेदात् संधिद्वैविध्यम् ॥

अथ आश्रयभेदात् सन्धिः पुनर्द्विविधः । स्वरसन्धिर्व्यञ्जनसन्धिश्च । स्वरसन्धिः संहितायामेवोपपद्यते । न तु संक्रान्तिसन्निकर्षे व्यवायसहे । तत्रैकमात्रिकस्वरस्य पूर्वार्द्धमात्रा पञ्चमबिन्दुः, परार्द्धमात्रा षष्ठबिन्दुरिति संज्ञायेते ॥ तथा च पूर्वस्वरषष्ठविन्दोः प्रत्ययस्वरपञ्चमबिन्दुत्वापत्तिरक्षरयोः संहिता । स स्वरसन्धिः ॥ अन्याक्षरनिगृहीतव्यञ्जनानामन्याक्षरेण निग्रहणं व्यञ्जनसन्धिः ॥*॥

(६) अथ बलभेदात् सन्धिद्वैविध्यम्

स्वरव्यञ्जनसन्धिभ्यां वर्णगुणातिरेको भवति। अन्यथा सतोऽन्यथाभावोऽतिरेकः। वर्णोपादानभूते वायौ वर्णस्वरूपविशेषोत्पत्त्यनुकूलं बलं वर्णगुणः। बलं द्विविधम्। आरम्भकं विशेषकं च। वर्णस्वरूपोत्पत्तौ विनियुक्तं बलमारम्भकम्। तत् पञ्चधा—स्वरोपधायकम् ॥१॥ अङ्गोपधायकम् ॥२॥ स्पर्शोपधायकम् ॥३॥ स्थानोपधायकम् ॥४॥ नादोपधायकं चेति ॥५॥

स्वरोपधानाद्—अ अ अ—इत्यनुदात्तस्वरितोदात्तभेदादकारत्रैविध्यम् ॥१॥ अङ्गोपधानाद्—अ आ आ ३। इत्येतेषां ह्रस्वदीर्घप्लुतानामेकैकाक्षरत्वम् ॥ व्यञ्जनानां च स्वराङ्गत्वं स्वरोच्चारणाधीनोच्चारणत्वम्, सव्यञ्जनस्वरस्यैकाक्षरत्वं च ॥२॥ स्पर्शोपधानाद्-अ ऽ अ ङ ग क ह—इत्यादयो धाराः ॥३॥ स्थानोपधानात्-अ इ उ ऋ लृ–इत्यादयो धाराः ॥४॥ उपांशुवाग्रूपायां मध्यमायां वाचि नादोपधानाद् ध्वनिप्रसङ्गाद् वैखरी वाक् प्रवर्तते ॥५॥

अथैतेष्वेव पञ्चसु बलेषु विनियुक्तं बलं विशेषकम्। तत् पञ्चधा-उपजनकम्॥१॥ उपघातकम्॥२॥ विक्षेपकम्॥३॥ विशेषाधायकम्॥४॥ निरोधकं चेति ॥५॥

प्रयत्नोपजनाद् वर्णागमः। प्रयत्नोपघाताद् वर्णलोपः। प्रयत्नविश्लेषाद् वर्णविपर्ययः। विशेषाधानाद् वर्णादेशः। एषां चतुर्णां निरोधात् प्रगृह्यत्वम्। तच्च विकारप्रतिबन्धात् प्रकृतिभावः-स्वरूपेणावस्थानम् ॥

इत्थं चारम्भकबले विशेषकबलतारतम्यानुरोधाद् व्यवेतस्याव्यवेतस्य वा बलवतो व्यञ्जनस्य गुणैः प्रतिबाधिता दुर्बलस्य गुणा निवर्तन्ते।

आक्रममाणाश्च बलवद्गुणाः स्थानं लभन्ते। तेनैतानि पञ्चविधानि सन्धिफलानि जायन्ते; यथाहुः—

"वर्णागमो वर्णविपर्ययस्तल्लोपस्तदादेश इमे विकाराः ॥
स्थितिः प्रकृत्येति च पञ्च सन्धेः फलानि वर्णद्वयसंनिकर्षे ॥१॥"

१- आगमो यथा ॥

संयोगविभागशब्देभ्यः शब्दोत्पत्तिमाह भगवान् कणादः ॥ तथाच—स्वरपूर्वो नासिक्येतरः स्पर्शः पदान्तोऽवसानेऽपदान्तश्च व्यञ्जनप्रत्यये पूर्वस्वरेणाक्रान्तो भवति ॥ तत्र पूर्वस्वरोऽभिक्रमते ॥ तेन बलवत्संयोगजवर्णसदृशः प्रतिध्वनिरूपो विभागजो वर्णः प्रादुर्भवति स क्रमजो नामोपजनः पराङ्गं स्यात् ॥

यत्या विच्छिद्योच्चारणहेतुभूतं पूर्वस्वरेण निग्रहणं क्रमणम् ॥ रामात्त् । वत्त्सः । आत्त्मा । सत्त्यम् । शक्कः । आतनच्च्मि । सज्ज्मा ।१।

हकारपरत्वे क्रमजस्य पराङ्गत्वेन तद्योगात् सोष्मवर्णसिद्धिः । वाग्घस्ती । षड्ढस्ती । तद्धस्ती । ककुब्भरती ॥२॥*॥

ङणनानां तु ह्रस्वस्वरपूर्वाणां स्वरोदयत्वे स उपजनः पराङ्गम् ॥ प्रत्यङ्ङात्मा । सुगण्णीशः । सन्नच्युतः ॥३॥

स्वरभक्त्युदयत्वेऽप्यसति विरोधे स्वरोदयवत् सन्धिफलम् । अस्ति ह्यूष्मणां स्वरभक्त्यारब्धत्वम् । अर्शः । आर्षम् । अर्हः । ह्रादः । ह्लादः । श्च्योतते । स्त्यानम् । स्त्री । ष्टेशन । स्थितिः । इत्यादिषूष्मोच्चारणात् प्राक् स्वरभक्त्या अकारेकाराद्यात्मन आभासमानत्वात् । तेन प्राङ्क्षष्ठः । सुगण्ट्षष्ठः । सन्त्सः । सञ्छम्भुरित्यादौ क्रममाणानां ङणनानां विभागजोपजना ङणना एव जायन्ते । किन्तु तेषां पराङ्गतया तेभ्यो नासिक्यतापादकयत्नो निवर्तते । संनिकृष्टानामुष्मणां नासिक्यप्रतिपन्थिगुणशालितया तेन नासिक्यगुणस्य प्रतिरुद्धत्वात् ।४।

सकारस्य नित्यदन्तस्थानत्वेन विवक्षया प्रगृह्यत्वम् ॥ तत्र दन्त्यतागुणप्राबल्यात् तत्प्रत्ययत्वोपजातस्य टस्य दन्त्यत्वम् ॥ षट्त्सुखिनः । षट्त्सन्तः ।५।

स्वरपूर्वाभ्यां रहाभ्यां परस्मिन् हभिन्नेऽनुष्मान्तस्थोदये व्यञ्जने

पूर्वस्वरः क्रमते न क्रमते वा। तर्कः, स्वर्ग्ग, गर्ज्जः, ब्रह्म, न ह्यस्ति। उच्चारणातिरेकोऽयमैच्छिकः सांप्रदायिको वा द्रष्टव्यः। उष्मान्तःस्थपरत्वे तु न क्रमते। कार्त्स्न्यम्। स्वर्ग्यम् ॥६॥

छकारेतरसोष्मस्पर्शे पराङ्गत्वं प्रबलमिति नात्र पूर्वः स्वरः क्रमते। मखः। मघा। शठः। अथ। वधः। सभा। छकारे तु पराङ्गस्पर्शे निसर्गात् पूर्वस्वरोऽपि क्रमते—इति क्रमजश्चकारोऽयमुष्मणा युज्यते। स्वच्छाया। शिवच्छाया। विच्छिद्यते। पदान्तदीर्घस्वरात्तु पदान्तयत्या विच्छेदादिदं क्रमणं निवर्तते, अनुवर्तते वा। सा च्छाया आच्छादयति। माच्छिददित्यादौ त्वैकपद्यविवक्षेति न विकल्पः।७।

यद्यपीदमुपजनवैचित्र्यं व्यञ्जनद्वयसंधाने व्यञ्जनगुणप्रकृतिनिबन्धनमेवोपपद्यते, तथापि तादृशप्रकृत्यनुकूलमुच्चारणमुच्चारयितृसंप्रदायविशेषादेवोपकल्पते। आच्छादयति माच्छिददित्यादौ चकारोपजनस्य सांप्रदायिकोच्चारणप्रकृत्यैवोपपन्नत्वात्। क्वचित्पुनरेष क्रमजोपजनो विवक्षाधीनो नैकान्तिकः। क्रमणस्योच्चारणविशेषाधीनतया सांप्रदायिकत्वात्।

अतएव दीर्घाद् द्वित्वं नास्तीत्याचार्य्य उपवर्षो मन्यते। इन्द्रः राष्ट्रमित्यादौ ह्यधिकव्यञ्जनयोगे द्वित्वं नास्तीति शाकटायनः। सर्वत्रद्वित्वं नास्तीति शाकल्यः। एते च क्रमजोपजनाः सांप्रदायिका अपि वर्णप्रकृतिसापेक्षाः सन्तीत्याख्याताः॥

केचित् पुनर्वर्णप्रकृतिनिरपेक्षाः केवलं भाषाव्यवहर्तृप्रकृतिसापेक्षतया व्यवहारविशेषादागमा भवन्ति। यथा—

"विश्ववाड्मुड्ध्रुगित्यादौ हकारात् प्राग्डगागमः॥
गर्भ उद्ग्राभनिग्राभौ संजभारेति वागमः॥१॥"

ईरेरिणौरादौ अकारागमः स्वैरः स्वैरी। तृतीयासमस्तस्याकारादृऋते, "प्रवत्सतरकम्बलवसनार्णदशानामृणे" उपसर्गाच्चाकारान्ताद् ऋकारादिधातुवृत्तेष्वकारागमः।

सुखेन ऋतः सुखार्तः ॥ प्रार्णम् । प्राच्र्छतीत्यादि । ते चैते पदनिबन्धना उपजना इहोपेक्ष्यन्ते ॥१॥

२- अथ लोपः ।

प्रयुगमिति वक्तव्ये उच्चारणदोषाद् यलोपः । प्रउगम् ॥१॥

उत् स्निगिति वक्तव्ये उदो दलोपः । उष्णिक् ॥२॥

"उदः स्थास्तम्भोः प्रयत्नोपघातात् सलोपः ।" उत्थानम् । उत्तम्भनम् ॥३॥

अवसाने "संयोगान्तस्य लोपः" । अथशब्दे थकाराकारस्य विपर्य्ययात् पदादित्वे पदान्तस्य हस्य प्रयत्नप्रतिबाधाल्लोपः । आत् । स्वतन्त्रनिपातत्वे पर्य्यायपरिवृत्तिसहोऽयम् ।

"आद्रात्री वासस्तनुते"—इत्यत्र अथ रात्रीति वक्तुं शक्यत्वात् । पञ्चमीविभक्तिनिपातत्वविवक्षायां त्वयं पर्य्यायपरिवृत्यसहो भवति देवात् । स्मनिपातेन सयुक्त्वे यस्मात्तस्मादित्यादौ सर्वनामान्तस्तकारः प्रयत्नक्लेशाल्लुप्यते ॥४॥

व्यञ्जनादुत्तरेषां नासिक्यान्तःस्थानां नासिक्यान्तःस्थपरत्वे लोपः ॥ शय्या—इत्यत्र प्राकृतयोर्यकारयोरेकः क्रमजे तृतीये यकारे विलुप्यते॥ अदितेरपत्यमादित्य इत्येको यकारः स क्रमजे यकारे विलुप्यते । आदित्यदेवताकः स्थालीपाक आदित्य इति द्वौ यकारौ, तौ क्रमजे तृतीये विलुप्येते ॥ संख्यातानुदेशान्नेह-तन्म्नानम् ॥५॥

नासिक्यान्तःस्थेतरेषां तु व्यञ्जनादुत्तरेषां सवर्णव्यञ्जनपरत्वे लोपः । मरुत्तः; प्रत्तामवत्तम् इतिद्वयोस्तकारयोरेकः क्रमजे तकारे लुप्यते । नेह संख्यातानुदेशः । तेन शिण्ढि, पिण्ढि—इति ढकारे डकारो लुप्यते । ग्रन्थ् धातोस्तुप्रत्यये तलोपाद् ग्रन्थुरित्यादयोऽप्युन्नेयाः ॥६॥

इ ए परस्य यस्य, उ ओ परस्य वस्यानभिव्यक्तिः । नरयीश्वरो नर ईश्वरः । योन्यायीश्वरः, योन्या ईश्वरः । भो एको, भोयेकः । हरयेकः हरएकः । त्वोतासः तोतासः । इत्येतेषु द्वयोर्द्वयोः साम्येनोच्चारणम् । "अत्र **"व्योर्लघुप्रयत्नतरः शाकटायनस्य"** ॥१॥ **"लोपः शाकल्यस्य ॥२॥"** **"ओतो गार्ग्यस्य ॥३॥"** इति त्रयः संप्रदायभेदाः ॥ भोयेको हरयेकः

इत्युभयत्र यकारस्य स्वरधर्म्मितया श्रवणं शाकटायनो मन्यते। भोएको हरएकः—इत्युभयत्राश्रवणं शाकल्यो मन्यते॥ गार्ग्यस्तु भो एक इति लोपं, हरयेकइति लघुप्रयत्नतरयकारं पश्यति ॥७॥

ऋचशब्दे रयानभिव्यक्तिर्लोके, छन्दसि तु लोप-तृचम्। ऋषिरिति रयानभिव्यक्तिः ॥८॥

३- अथ विपर्य्ययः।

अक्षवाहिनी, प्रवाह, प्रवाढ प्रवाढीति प्राप्ते वाऽक्षरविशकलनात् सिद्धानाम्—उ अ अ—इत्येतेषां विपर्य्ययेण सन्धौ अक्षौहिणी-प्रौह-प्रौढ-प्रौढिसिद्धिः ॥१॥

स्थिरशब्दोष्मणः स्वरभक्तेर्विपर्य्ययेण सकारादुत्तरत्वे प्रयत्नदोषात् सस्वरभक्त्योस्तालव्यत्वे शिथिरशिथिलशब्दसिद्धिः। अथवा श्रथश्लथान्तस्थयोर्विपर्य्ययेण शथर-शथल संपत्तौ प्रयत्नदोषादिकारद्वयोपनिपातः। शिथिरः शिथिलः ॥२॥

पश्यकशब्दे पकयोर्विपर्य्ययेण कश्यपत्वम् ॥ शययोर्विपर्य्ययेण जाते प्रयत्नप्रतिबाधेन यकारस्य स्पर्शोत्कर्षाज्जत्वचत्वाभ्यां शस्य तु स्पर्शोत्कर्षाच्छत्वे कच्छपशब्दो निर्वृत्तः॥ कशामर्हति कश्योऽप्येवं कच्छोऽभवत् ॥३॥

अथशब्दे पदान्ताकारस्य पदादित्वेन विपर्य्यये आच्छब्दो निपातः ॥४॥

एवपदादेः सन्ध्यक्षरस्य पदान्तत्वविपर्य्यये वैशब्दसिद्धिः ॥५॥

अनश्व इति अन् शब्दो नविपर्य्ययसिद्धः ॥६॥

कृती छेदने इत्यस्मात् उप्रत्यये कर्तुरिति वक्तव्ये ककारतकारयोर्विपर्यासे तर्कुरिति, तुशब्दे तकारोकारयोर्विपर्यासे उत् इति भृधातोर्मनिन्प्रत्ययान्निष्पन्ने भर्मन् शब्दे बकारोत्तरवर्तिनोः हकारे-

फयोः स्थानविपर्यासे ब्रह्मन् इति, ओम् शब्दे अ उ म् इत्येतेषु वर्णेषु अकारस्य उकारस्य च विपर्यासे वम् इति च निष्पद्यते। तदुक्तम्-

''ओमोऽकारोकारयोर्वम् परस्परविपर्य्ययात् ॥
भर्मणो हरयोर्ब्रह्म परस्परविपर्य्ययात् ॥१।६॥
बहोर उत्वमैत् सोऽभूद्धात्परो भूरभूदयम् ॥
धातुस्ततोऽभूद् भूभूंमिभूंमा भूयात् बहुं बृजन् ॥२।६॥
निर्ग्रन्थुशब्दे रहयोर्निघण्टुः स्याद् विपर्य्ययात् ॥
विक्षेपात् तरयोरेकबिन्दुत्वे स्पर्शनद्रुतेः ॥३।१०॥

४- अथ आदेशः।

आरम्भके बले यत्र विशेषकबलोदयात् ॥
लोपागमविपर्य्यासबलानां स्युः समुच्चयात् ॥१॥
गुणानां कस्यचिन्नाशः कस्यचिच्चागमः सह ॥
कस्यचिद्वा विपर्य्यासस्तमादेशं प्रचक्षते ॥२॥

विशेषकवलं तावन्नानाविधं भवति। तस्य प्रत्येकवलस्य तारतम्यात् पुनरत्र नानाविध्यं प्रवर्तते। तद्यथा गतिरेकं बलम्। तत्र द्रुतिसमप्लुतयो विशेषाः स्युः। उरः कण्ठः शिर इति त्रीणि सवनस्थानानि। तत्प्रापकं बलं स्वरोपधायकं नाम। तत्र विशेषकबल-तारतम्याद् विशेषाः। यथा उदात्तस्वरितयोः प्रकृतत्वे द्रुतिगत्याऽनुदात्तत्वम्। अनुदात्तोदात्तयोः समगत्या स्वरितत्वम्। अनुदात्तस्वरितयोः प्लुतिगत्योदात्तत्वम्। अथ सन्धारणमन्यद्बलम्। तेन स्वरोपधाने प्रतिसवनं द्वौ द्वौ विशेषौ—निगृहीतमुद्गृहीतं च। तथा च सन्नतरानुदात्तौ। स्वरितप्रचितौ। उदात्तोदात्ततराविति षट् स्वराः स्युः। उरसि नीचैः सन्नतरो निघातः। उरस्येवोच्चैरनुदात्तः। कण्ठे नीचैः स्वरितः। तत्रैवोच्चैः प्रचितः। शिरसि नीचैरुदात्तः। तत्रैवोच्चैरुदात्ततरः॥

शिरः	❀	उदात्ततरः——————१
	❀	उदात्तः——————२
कण्ठः	❀	प्रचितः——————३
	❀	स्वरितः——————४
उरः	❀	अनुदात्तः——————५
	❀	निघातः (सन्नतरः)–६
नाभिः	❀	

तारतम्यकृतविशेषानपेक्षायां तु त्रय एव ते स्वरा उपपद्यन्ते । तथा चाह—

॥ उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा ॥१॥

अथाङ्गोपधायके बलेऽभिव्याप्तिरेकं विशेषकबलम् । तत्रावच्छेद-तारतम्यं मात्रा नामान्यद्बलमनुवर्त्तते । तथा चैकमात्रो ह्रस्वः । द्विमात्रो दीर्घः । त्रिमात्रः प्लुतः । तदेकं छन्दः । स्वरमात्रमक्षरम् । अथवा व्यञ्जनेनैकेन, द्वाभ्यां, त्रिभिः, चतुर्भिः, पञ्चभिः, षड्भिः सप्तभिर्वाऽवच्छिन्नमक्षरमित्यन्यच्छन्दः ॥२॥

अथ स्पर्शोपधाने विवृत[1] मन्द[2] दुर्योग[3] द्विस्थानिक[4] मृदु[5] तीव्रा[6]-ऽर्द्धसम भेदात् सप्त विशेषाः । समसांमुख्येनावस्थितयोः स्थान-करणयोर्म्मध्येऽवगुण्ठितेन वर्णोपादानभूतप्राणवायुना स्पर्शप्रतिबन्धो विवृतम् ॥१॥ स्थानकरणयोरस्पृष्टयोरेव स्पर्शोन्मुखत्वप्रयत्नतः स्पर्श-मान्द्यम् ॥२॥ तत्रैवात्यल्पमात्रया स्पर्शप्रसक्तौ दुर्योगः । स च करण-वैषम्यात् स्पर्शाऽस्पर्शः ॥३॥ मुखस्थानस्पृष्टस्योपरिष्टान्नासानाडीस्पर्शो द्विस्थानिकत्वम् ॥४॥ मृदुस्पर्शाद् गजडदबाः ॥५॥ तीव्रस्पर्शात् क च ट त पाः ॥६॥ अर्द्धसमत्वं सस्वरभक्तिकत्वादंशतो विवृतमंशतः स्पर्शः ॥७॥ तदित्थमेषां विशेषकबलानां प्रत्यासत्या स्पर्शतारतम्यं घटत इति वर्णान्तरादेशः । यथा—इ उ ऋ लृ—इति नामिनः स्वराः । तेषां विवृतप्रयत्नानां स्थानेऽन्तरतमा ईषत्स्पृष्टा अन्तस्था असवर्णस्वरपरत्वे । दिव्यस्ति । मध्वस्ति । पित्रागमः ॥३॥

स्थानोपधायके च द्रुतिसमप्लुतयो विशेषाः। द्रुतिगत्या प्रथमस्थाने कण्ठे, समगत्या मध्यमस्थाने तालुमूर्द्धदन्तान्यतमे, प्लुतिगत्योत्तमे स्थाने ओष्ठे स्थानोपधायकबलस्यावपातः। मध्यमेऽपि समद्रुत्या तालुनि। समसाम्यान्मूर्द्धनि। समप्लुत्या दन्तेऽवपातः। द्रुत्या तस्य कः—शुष्कः। प्लुत्या च तस्य वः—पक्वः। समसाम्यात् तस्य टः-कृष्टः ॥ एकस्थानिकस्य द्विस्थानिकत्वसाधनात् तस्य नः—वृक्णः, हीनः। प्लुत्या द्विस्थानिकत्वसाधनाच्च क्षामः ॥४॥ क्वचित्तु स्थानबलस्पर्शबलयोरुभयोरपि विशेषाधानात् सिद्धिः॥ यथा—सरयोरघोषपरत्वेऽवसाने च विसर्गः। उच्चैः पुनः पुनः ॥१॥ अकारात्परः सो हत्वमापद्योत्वमापद्यते अकारघोषपरत्वे। देवोऽस्ति, देवो गतः ॥२॥ आकारात्तु सस्य हत्वमापन्नस्य विवृत्तिः स्वरघोषपरत्वे। यथा-देवा गच्छन्ति, देवा हसन्ति, देवा आयान्तीत्यादौ। इकारादिभ्यः स्वरेभ्यः परस्तु स रेफतामापद्यते स्वरघोषपरत्वे। यथा-हरिरयं, हरिर्गतः। भानुरयं; भानुर्गतः। उच्चैरयं नोचैर्गतः ॥४॥ स्वरेभ्यो रसयोरघोषपरत्वे तदघोषस्थानीयोष्मा। शिव ᳵ करोति। हरिश्चिनोति। भानुष्टीकते शनैस्तन्वते। उच्चै ᳵ पठति ॥५॥ इत्येवंविधेष्वादेशविकारेषु वर्णगुणा लुप्यन्ते विपर्य्ययन्ते वा इत्यूह्यम् ॥

अथ प्रकृतिभावः

यस्य स्वरूपमेव दर्शयितुमिष्यते। स प्रकर्षेण गृहीतत्वात् प्रगृह्यः। स हि सत्यपि विकारनिमित्तप्रत्यासत्तौ प्रगृहीतत्वादेव न स्वरूपाच्च्यवते। न विकारं गृह्णाति। ई ऊ ए—द्विवचनं प्रगृह्यम्। हरी एतौ, विष्णू इमौ। द्रव्ये इमे। ईषदर्थमदध्यर्थमाकारं त्यक्त्वा एकः स्वरो निपातः प्रगृह्यः। अ. इ. उ. ऋ. लृ. ए. ओ. ऐ. औ। ओकारान्तो निपातः प्रगृह्यः। अहो ईशाः विवक्षानिबन्धनोऽयं प्रकृतिभावो यथाविवक्षं द्रष्टव्यः ॥

इति श्रीमधुसूदन-विद्यावाचस्पतिप्रणीते पथ्यास्वस्तिग्रन्थे सन्धिप्रभेदपरिष्कारः पञ्चमः प्रपाठः।

——

पथ्यास्वस्ति

हिन्दी व्याख्या

१ वेद में वर्णमातृका को पथ्यास्वस्ति कहा जाता है । अतः पथ्यास्वस्ति शब्द का अर्थ वर्णमातृका है । ग्रन्थकार कहते हैं कि[1] शब्द-ब्रह्म के ज्ञान के बिना परब्रह्म का ज्ञान नहीं हो सकता, अतः परब्रह्म-रूपी अक्षर (अविनाशी) तत्व के ज्ञान के लिए विज्ञानतत्पर श्रीमधुसूदन झा यहाँ शब्द-ब्रह्म का निरूपण कर रहे हैं ।

अनेक प्रकार का वर्णाक्षर-समाम्नाय लोक में प्रसिद्ध है । उनमें से यहाँ वैदिक वर्णमातृका का प्रधानतया निरूपण किया जा रहा है ।

ओष्ठों से ढकी हुई, दाँतों से परिवेष्टित सारे वर्णों को उच्चारण करने में समर्थ वज्ररूपा यह नकुलाकारिणी जिह्वा मुझे सुन्दर शब्दों का उच्चारण करने के लिए प्रेरित करे ।

वर्णसमाम्नाय (वर्णमातृका) नित्य है । उसकी उत्पत्ति नहीं होती, स्थान-प्रयत्न-संयोग से उसकी अभिव्यक्तिमात्र होती है । इसीलिए महाभाष्यकार पतञ्जलि ने 'सिद्धे शब्दार्थसम्बन्धे' इस उक्ति के द्वारा शब्दों को, अर्थों को, तथा उनके पारस्परिक सम्बन्ध को नित्य बतलाया है ।

२ (१) समान प्रयत्न वाले तथा भिन्न स्थान वाले वर्ण :—

अ	इ	ऋ	ऌ	उ
ऽ	य	र	ल	व
अ़	य़	ड़	ऴ	व़
ग	ज	ड	द	ब
क	च	ट	त	प
ह	श	ष	स	ह

---

१ द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।
शाब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ मु.उ.

३ (२) समान स्थान वाले तथा भिन्न प्रयत्न वाले वर्णः—

अ	ऽ	अ़	ग	क	ह
इ	य	य़	ज	च	झ
ऋ	र	ड़	ड	ट	ष
लृ	ल	ऴ	द	त	स
उ	व	व़	ब	प	ह

इस प्रकार वैदिक वर्णमातृका के अनुसार ३० शुद्ध वर्ण हैं। इनमें हकार का उच्चारण कहीं कण्ठ-स्थान से तथा कहीं ओष्ठ-स्थान से होता है। अतः स्थान-भेद से उसके दो भेद होने पर भी उच्चारण में कोई भेद नहीं है। अतः 'ह' वर्ण एक ही है इस दृष्टि से शुद्ध वर्ण २९ हैं।

समान प्रयत्न वाले तथा दो स्थानों वाले वर्णः—

४ अँ	इँ	ऋँ	लृँ	उँ—अस्पृष्ट अनुनासिक
०	यँ	०	लँ	वँ—ईषत्स्पृष्ट अनुनासिक
ङ	ञ	ण	न	म—स्पृष्ट अनुनासिक

इस प्रकार अनुनासिक वर्ण १३ हैं। इस प्रकार प्राकृतिक निरूढ (प्रसिद्ध) वर्ण ४२ हैं। इससे भिन्न वर्ण इन्हीं वर्णों के विकार हैं जैसे यौगिक तथा अयोगवाह वर्ण।

५ यौगिक वर्ण स्वर-व्यंजन-भेद से दो प्रकार के हैं। दीर्घ और प्लुत आ, ई, ऊ, ॠ, ए, अय्, ऐ, आइ, ओ, अव्, औ, आउ ये १६ यौगिक स्वर हैं। ये प्रत्येक यौगिक स्वर शुद्ध तथा अनुनासिक-भेद से दो प्रकार के हैं। अतः ३२ यौगिक स्वर होते हैं।

६ वर्गों के द्वितीय वर्ण ख, छ, ठ, थ, फ तथा चतुर्थ वर्ण घ, झ, ढ, ध, भ तथा ढ़ और ळ्ह-ये १२ सांयौगिक व्यंजन हैं। जिनमें उष्म हकार तथा शुद्धस्पर्श-वर्णों का योग है। इस प्रकार मिला कर ३२ + १२ = ४४ यौगिक वर्ण हैं।

७ इनके अतिरिक्त कुछ अयोगवाह वर्ण और हैं। अयोगवाहों में स्वरभक्ति, रङ्ग, अनुस्वार, विसर्ग, औरस्य उष्मा, जिह्वामूलीय, उपध्मानीय तथा यमों की गणना है। इनमें ऋ, लृ, इ—ये तीन स्वरभक्तियां हैं। आँ ईँ ऊँ ये तीन रंग-वर्ण कहलाते हैं।

अं अः ये दोनों क्रमशः अनुस्वार व विसर्ग कहलाते हैं।

१ ह्ल ह्व—ये औरस्य उष्मा कहलाते हैं।

≍क ≍ इनमें क और प से पूर्व अर्धविसर्गसदृश चिह्न क्रमशः जिह्वा-मूलीय व उपध्मानीय कहलाता है।

कुं खुं गुं घुं ये चार यम कहलाते हैं।

उपर्युक्त रीति से अयोगवाह ११ हैं।

स्वरभक्ति

८ ऋ और लृवर्णों में क्रमशः रेफ और लकार के चारों तरफ स्वरभक्ति है। याज्ञवल्क्य ने शिक्षा में इसका स्पष्ट उल्लेख किया है। जैसे—

"ऋलोर्मध्ये भवत्यर्द्धमात्रा रेफलकारयोः।
तस्मादस्पृष्टता न स्याद् ऋलृकारनिरूपणे॥"

अर्थात् ऋ और लृवर्णों में क्रमशः आधी मात्रा रेफ और लकार की है और ये ईषत्स्पृष्ट प्रयत्न वाले हैं। अतः ऋ और लृ को अकारादि वर्णों की तरह अस्पृष्ट नहीं माना जा सकता। ऋकार और लृकार में विद्यमान स्वरभक्ति का सम्प्रदायभेद से चार प्रकार से उच्चारण किया जाता है। कुछ व्यक्ति उस स्वरभक्ति का अकार के समान उच्चारण करते हैं, जैसे ऋषि का रषि। प्राच्य लोग इकार के समान जैसे ऋषि = रिषि। उदीच्य लोग उकार के समान जैसे ऋषि—रुषि। और माध्यन्दिन-शाखा वाले उसका एकार के समान उच्चारण करते हैं जैसे ऋषि—रेषि। इसीलिए "ऋकारस्य तु संयुक्तासंयुक्तस्याविशेषेण सर्वत्रैवम्" इस प्रतिज्ञा-सूत्र में तथा "[२]ऋकारो हल्वियुग्युक् च सैकारश्छन्दसि स्मृतः" इस केशवी के वचन में ऋकार की स्वरभक्ति का एकार के

---

१ तत्र द्वावौरसौ ह्व इति ह्य इति, इस प्रकार याज्ञवल्क्यशिक्षा में ह्व तथा ह्य को ही औरस्य उष्मा बतलाया है न कि ह्ल व ह्व को किन्तु यहां भी 'ह्व' अन्तस्थों का तथा 'ह्म' पञ्चम वर्णों का बोधक है। अर्थात् य, र, ल, व, इन अन्तःस्थ वर्णों के साथ वर्गों के पञ्चम वर्ण ङ, ञ, ण, न, म, के परे होने पर उससे पूर्ववर्ती हकार उरःस्थानीय होता है। इसीलिए टीकाकार श्रीअमरनाथ दीक्षित ने याज्ञवल्क्योक्त उपर्युक्त ग्रन्थ की व्याख्या करते हुए कहा है—वर्गपञ्चमैरन्तस्थाभिश्च युतो द्विविधो हकारो ह्वसदृशो ह्मसदृशश्च औरसो ज्ञेयः। या. शि. पृ. १५२

२ ऋवर्ण जैसे हल् (व्यञ्जन) से संयुक्त हो या वियुक्त, वेद में उसका उच्चारण एकार का होता है।

समान उच्चारण बतलाया है। जैसे कृष्ण—क्रेष्ण, ऋत्विय:=रेत्विय:, क्लृप्त= क्लेप्त। इन सूत्रों में इकार व उकार के समान उच्चारण का निषेध किया है। उपर्युक्त रीति से अ, इ, उ, ए ये चार अर्धमात्रिक स्वरभक्तियां सम्प्रदायभेद से हैं। इनके उच्चारणमात्र में सम्प्रदायभेद से भेद हैं। लिपि सभी मतों में समान है-ऋ, लृ। क्योंकि उच्चारण के अनुसार लिपि का भेद नहीं बन सकता। अकारादि उच्चारण के समान लिपि में भेद करने पर ऋ के स्थान में र, रि, रु या रे लिपियां होंगी और इन लिपियों में अकारादि स्वर एकमात्रिक हैं जब कि ऋकार और लृकार में विद्यमान स्वरभक्ति [1]अर्धमात्रिक है। अर्धमात्रिक का उच्चारण तो बन सकता है पर लिपि में अर्धमात्रिक अकारादि की पृथक् लिपि नहीं है। अतः लिपि में ऋ लृ ही लिखे जाते हैं। लृकार के उच्चारण में प्रायः लकार के बाद रेफ का उच्चारण और करते हैं। जैसे लृलि्। पर यह संगत नहीं है क्योंकि लृ में केवल लकार और स्वरभक्ति ही है न कि रेफ।

६ र्ह भी स्वरभक्ति है। र्ह में रेफ लकार का भी बोधक है और हकार उष्म वर्णों का बोधक है। अतः यह सिद्ध होता है कि र और ल से उष्म-वर्ण के परे होने पर दोनों के बीच में स्वर के समान एक ध्वनि उत्पन्न होती है उसे स्वर-भक्ति कहते हैं। इसीलिए याज्ञवल्क्य-शिक्षा में लिखा है—

"रलाभ्यां पर उष्माणो यत्र तु स्युः स्वरोदयाः।
स्वरभक्तिरसौ ज्ञेया पूर्वमाक्रम्य पठ्यते॥ १॥
स्वरभक्तिं प्रयुञ्जानस्त्रीन् दोषान्परिवर्जयेत्।
इकारं चाप्युकारञ्च ग्रस्तदोषं तथैव च॥ २॥

अर्थात् र और ल से परे उष्म-वर्ण श, ष, स हों तथा उनसे परे कोई स्वर हो तो वहां दोनों के बीच अर्ध अकार की तरह एक ध्वनि उत्पन्न होती है उसे स्वरभक्ति कहते हैं। इस स्वरभक्ति का उच्चारण पूर्व वर्ण रेफ के साथ होता है। स्वर-भक्ति का प्रयोग करने वाला इकार, उकार तथा स्थान-करणनिष्पीडनरूप संवृतता इन तीन दोषों का परित्याग करे। अर्थात् स्वरभक्ति का उच्चारण न अर्ध इकार की तरह, न अर्ध उकार की तरह और न स्थान व करण का निष्पीडन

१ 'स्वरभक्ति' शब्द का अर्थ ही स्वर का भाग है न कि पूर्णस्वर। अतः वह अर्धमात्रिक ही होती है न कि अकारादि स्वरों की तरह एकमात्रिक।

करते हुए करे अपि तु अर्ध अकार या एकार की तरह करे। इसीलिए—"[1]अथापरान्तस्थस्यायुक्तान्यहलः संयुक्तस्योष्मऋकारैरेकारसहितोच्चारणमेवं तृतीयान्तस्थस्य" इस कात्यायनीय प्रतिज्ञासूत्र में स्वरभक्ति का उच्चारण एकार की तरह बतलाया है। इसी प्रकार '[2]अहल् शल्यूर्ध्वरेफस्य सैकारः प्राक् च' इस नवाङ्कसूत्र में, '[3]विहल् शल्यूर्ध्वरेफो यःसैकारः प्राक् समुच्चरेत्' इस केशवी-वचन में '[4]रेफो रेकारमाप्नोति शषसहेषु परेषु च' इस माध्यन्दिनीय वचन में भी यही बात बतलायी गयी है।

"रलावृलृवर्णाभ्यामूष्मणि स्वरोदये सर्वत्र" इस प्रातिशाख्य के अनुसार रेफ और लकार से परे उष्म-वर्णों के होने पर दोनों के मध्य अर्धमात्रिक ऋकार और लृकाररूप स्वरभक्ति का व्यवधान है। रेफ और उष्मवर्णों के बीच विद्यमान उस स्वरभक्ति का उच्चारण रेफ और लकार की तरह होता है अर्थात् ऐसे स्थान में द्विरुक्त रेफ और द्विरुक्त लकार का सा उच्चारण होता है। जैसे—अर्शः—अर्रशः, वल्शा—वल्लशा इत्यादि उदाहरणों में स्पष्ट है। इस प्रकार रेफ, लकार और उष्म-वर्णों के मध्य स्वरभक्ति का उच्चारण अकार की तरह, एकार की तरह, और द्विरुक्त रेफ व द्विरुक्त लकार की तरह मतभेद से उच्चारण होता है। किन्तु अथर्ववेदीय इस स्वरभक्ति का उच्चारण इकार की तरह करते हैं। जैसा कि माण्डूकी शिक्षा में कहा है—"सम्यगेनां यदा पश्येत् शतबलिशेति निदर्शनम्"। ऋग्वेदीय इसका उच्चारण उकार की तरह करते हैं जैसे धूर्षदम् = धूरुषदम्। जहाँ उष्म-वर्णों से परे स्वर होता है वहीं इस स्वरभक्ति का उच्चारण होता है और जहाँ व्यजन होता है वहाँ नहीं। जैसे वर्ष्म शब्द में उष्म से परे 'म' व्यंजन के होने से रेफ और 'ष' के बीच स्वरभक्ति का उच्चारण नहीं होता[5]।

---

१ अन्य हल् वर्णों से असंयुक्त तथा श ष स ह ऋकार वर्णों से संयुक्त अपरान्तस्थ(र) तथा तृतीयान्तस्थ(ल) वर्ण का एकार-सहित उच्चारण होता है।

२ हल् (व्यञ्जन) रहित शल्प्रत्याहार (श, ष, स, ह,) परे होने पर उनसे पूर्व रेफ का एकार सहित उच्चारण होता है।

३ हल्-रहित शल् प्रत्याहार परे होने पर उससे पूर्व रेफ का एकारसहित उच्चारण होता है और वह एकार पूर्ववर्ती रेफ का अङ्ग होता है।

४ श ष स ह—इन वर्णों के परे होने पर रेफ का रेकार की तरह उच्चारण होता है।

५ इस तथ्य का प्रतिपादन याज्ञवल्क्य-शिक्षा में 'स्वरोदयाः' पद से, प्रतिज्ञा-सूत्र में।

रङ्ग

१० 'देवा ँ॒ एह, महा ँ॒ असि' इत्यादि में विशुद्ध आकार से परे नासिका से उच्चार्यमाण वर्ण रङ्ग कहलाता है। तालुस्थानीय स्पृष्टप्रयत्नीय मृदु अनुनासिक वर्ण नकार के तालु, मृदु व स्पृष्टत्व गुण का नाश होने से अर्धमात्र उस नकार वर्ण के स्थान में अर्धमात्र अनुनासिक-विवृतिरूप अकार शेष रह जाता है। व्यंजन नकार का पूर्व स्वर के द्वारा अनुरंजन होने से नकार की स्वर की तरह प्रतीति होती है। अतः पूर्वस्वररंजन के कारण यह नकार रङ्ग कहलाता है। इसे अनुस्वार नहीं कह सकते क्योंकि अनुस्वारस्थल में स्वर और अनुस्वार का अव्यवधान होने से पूर्व स्वर अनुस्वार से ग्रस्त प्रतीत होता है। जैसे रामं हरिं, आदि में अकार और इकार अनुस्वार से ग्रस्त प्रतीत हो रहे हैं और रङ्ग-स्थल में रंग का दीर्घ स्वर से पृथक् उच्चारण होने के कारण स्वर उससे ग्रस्त प्रतीत नहीं होता। अतः यह रंग वर्ण-अनुस्वार से भिन्न है। इसीलिए याज्ञवल्क्य-शिक्षा में कहा है—

> "रङ्गवर्णं प्रयुञ्जीरन् नो ग्रसेत् पूर्वमक्षरम्।
> दीर्घं स्वरं प्रयुञ्जीयात् पश्चान्नासिक्यमाचरेत् ॥

रङ्ग-वर्ण का प्रयोग करते समय पूर्व स्वर को रंग से ग्रस्त न करे अर्थात् इस प्रकार शीघ्रता से रंग-वर्ण का उच्चारण न करे जिससे रंगवर्ण के कारण पूर्व स्वर में ग्रस्तता आ जावे। उसके पहले दीर्घस्वर का प्रयोग करे, पश्चात् नासिक्य रंगवर्ण का उच्चारण करे।

अनुस्वार

१३. अं, यहाँ पर स्वर के बाद नासिका से उच्चार्यमाण वर्णअनुस्वार है।

'अयुक्तान्यहलः' पद से, नवाङ्कसूत्र में 'अहल्-शलि' में 'अहल्' पद से, 'विहल्-शलि' इत्यादि केशवीवचन में विहल् पद से किया गया है। 'स्वरोदयाः' का अर्थ है—शकारादि उष्मवर्णों के बाद स्वर होना चाहिए न कि हल्-वर्ण। 'अयुक्तान्यहलः का अभिप्राय है कि शकारादि उष्मवर्ण हल् (व्यंजन) वर्णों से युक्त नहीं होने चाहिएँ। अहल् तथा विहल् पद का भी यही अभिप्राय है कि शकारादि वर्ण हल्-रहित होने चाहियें, अर्थात् उनका संयोग किसी व्यंजन से नहीं होना चाहिए।

यहाँ अनुस्वार की नकार को तरह प्रतीति होता है। किन्तु नकार मृदुस्पृष्ट वर्ण है जब कि अनुस्वार ईषत्स्पृष्ट वर्ण है। अतः यह नकार से भिन्न वर्ण है। श, ष, स, ह इन वर्णों के परे होने पर अनुस्वार का उच्चारण तीन प्रकार का होता है। यहाँ अनुस्वार का नकार-ध्वनि के समान उच्चारण बह्वृच (ऋग्वेद वाले) करते हैं जैसा कि पाणिनिशिक्षा में कहा है—'[1]श, ष, स, ह के परे होने पर तूंबीवीणा के शब्द के समान दन्तमूलमात्र से उच्चारित होने वाले स्वरपश्चाद्-भावी अनुस्वार का उच्चारण करना चाहिए। जैसे—वंन्शः, कंन्सः इत्यादि में। यहाँ अनुस्वार के बाद जो 'न्' व्यंजन लिखा गया है उसका तात्पर्य यह है कि अनुस्वार दन्त्य-अनुनासिक है, अतः इसका उच्चारण नकार की तरह होता है पर यह नकार नहीं है। अन्य वर्णों के परे होने पर जैसे अनुस्वार का अनुस्वार शब्द से व्यवहार होता है वैसे ही श, ष, स, ह इन वर्णों के परे होने पर अनुस्वार-व्यवहार ही होगा। अकार या गुंकार आदि अन्य नाम इसका नहीं होगा।

१२. छन्दोगशाखा वाले (सामवेदीय) इस अनुस्वार की मकार के समान ध्वनि मानते हैं और व्यवहार के लिए इसका नाम मकार रखते हैं। जैसा कि नारद-शक्षा में कहा है :

"आपद्यते मकारं रेफोष्मसु प्रत्ययेष्वनुस्वारः।
यवलेषु परसवर्णं स्पर्शेषु चोत्तमापत्तिम्॥

अर्थात् रेफ और श, ष, स, ह के परे होने पर अनुस्वार को मकार होता है, य, र, ल, व परे होने पर परसवर्ण और स्पर्शवर्णों के परे होने पर उसी स्पर्श का पञ्चम वर्ण होता है। अथवा "अनुस्वारं रोष्मसु मकारः" इस कात्यायन-प्राति-शाख्यसूत्र की एकवाक्यता नारदशिक्षा के साथ मानने पर यहां नारदीयशिक्षा के वचन में भी अनुस्वार को मकार हो जाता है इत्यर्थक "आपद्यते मकारो रेफो-ष्मसु प्रत्ययेष्वनुस्वारम्" यह पाठ मानना होगा। अथवा नारदीय शिक्षा के उत्तर पाठ के अनुसार मकार के स्थान में अनुस्वार का विधान मानने पर भी उसका अभिप्राय यही माना जायगा कि छन्दोग-सम्प्रदाय के अनुरोध से रेफ उष्म आदि

---

१ अलाबुवीणानिर्घोषो दन्तमूल्यः स्वरानुगः।
अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च॥ पा० शि०

वर्णों के परे होने पर अनुस्वार की मकार के सदृश ध्वनि होती है। अतः छन्दोग-सम्प्रदाय के अनुसार 'वंम्शः, कंम्सः' ऐसा उच्चारण होता है अर्थात् यहाँ अनुस्वार की ध्वनि मकार के समान है न कि अनुस्वार को मकार ही हो जाता है—यह तात्पर्य है।

